Chapter VII : About Vaiśeṣika. According to this school, the soul (*ātman*) is a substance that has intelligence (*buddhi*) and other *guṇa-s* as its attributes. These attributes — corresponding to those listed in *Nyāyasūtra* I.1.10 (*icchā-dveṣa-prayatna-sukha-duḥkha-jñānāny ātmano liṅgam*) — would imply that the soul is subject to change. Therefore, it cannot be permanent. And thus it cannot become free. As Bhavya points out (2), an extensive refutation of the soul as an entity (*bhāva*) has already been provided previously (above). Vaiśeṣika is irrational and not worthy of serious consideration. The entire chapter consists of merely 28 stanzas of which only the final two are available in Sanskrit.

Even from this brief review of chapters VI and VII, it will be seen that Bhavya's main concern is focused on the nature of the soul. Specific theories about other matters peculiar to Sāṃkhya and Vaiśeṣika are only of little or incidental interest — and importance — to him. The soul must not be a substance or exhibit attributes that are not compatible with requirements for its being released from ignorance. One cannot have a soteriology without a psychology (in the literal sense of those terms). The dilemma always is that either the soul does or knows some-

thing, which makes it dependent and impermanent, or else it knows or does nothing, which makes it superfluous. Bhavya's *nairātmyavāda* is designed to avoid these two extremes. Further variations of the same theme are to be found in the following chapter.

Chapter VIII : About Vedānta. The same permanent, universal and creative soul is found everywhere in all individuals, it is claimed in the scriptures of Vedānta (many of which are quoted in the *TJ*). By means of yoga (*dhyāna*) and cognition each individual must wake up in order to participate in the immortality of the soul. It is because one is normally under the sway of karma (and rebirth) that one fails to recognize the identity of the individual soul with the universal soul (1-17).

Bhavya's reply (18-104) : The notion about the existence of a soul is dangerous, and in various ways contradictory and irrational. One cannot possibly attain release from ignorance by 'seeing the soul' (19-24). The soul cannot create anything (25-35). It cannot be bound and it cannot be set free (36-9), nor can it consist of cognition (40-9). The individual soul cannot rest in the universal soul (50-3), and if it is assumed to be numerically one, then it cannot possibly possess a manifold nature (54-8). Nor can it be conceived as a substance or as something that supports (59-64), just as the unity of all souls cannot be conceived analogically with the identity of space in many individual jars (65-70). The soul cannot be in-

volved in the process of karma (71-2), and it cannot be one, universal, indescribable and inconceivable (73-7). The soul cannot be known as something unborn (78-83). It is true that the absolute in Vedānta occasionally is understood in almost the same way as in Madhyamaka, but the reason for this must be that Vedānta has 'borrowed', i.e. stolen, from Buddhism. There are, in fact, many things in Vedānta where the former is not consistent with the latter. The internal contradictions show the lack of originality in Vedānta (84-8). The adherents of Vedānta are, thus, most welcome to convert to Madhyamaka ! Bhavya concludes by restating his own persuasions about the absolute, lack of origination, emptiness, etc. (89-104).

Chapter IX : About Mīmāṃsā, the ritual branch of Vedānta. Here the orthodox Brahmans opine that it is only by means of rituals (*kriyā*) — as opposed to yoga and cognition — that one may achieve the desirable state of liberation (*apavarga*). The three Veda-s prescribe our duties (*dharma*), and the Veda is authoritative because it does not derive its high status from fallible mortals. It consists of words that are permanent. The Veda is the word. It rests upon revelation and it has been transmitted down to us by tradition (*āgama*). As a source of knowledge the Veda thus has greater authority than other means of cognition, such as perception and inference. In brief, it is only by practising the rituals enjoined by Vedic authority that students may achieve the release from

this world that virtually all schools hold up as the ultimate purpose of human existence (1-17).

Bhavya's reply (18-167) : As usual, Bhavya takes the position that statements must be rational, scientific, in order to be acceptable. This is seldom the case with Mīmāṃsā. Tradition never becomes true just because it is old. Many things are old without, for that reason, being true. Rituals are mere actions ; they do not lead to release. That the Veda has no human origin proves nothing about its validity. Incidentally, it is not true that all human beings cannot be relied upon. Certain observations suggest that the Veda actually has a human author, even an evil human author. Thus, the Veda prescribes ritual murder, the consumption of alcohol, etc. This is simply immoral behaviour, no matter what kind of explanation or excuse one may come up with (18-42).

Moreover, the Veda cannot possibly consist of anything so absurd as an 'eternal word' (43-9). Revelation and tradition (*āgama*) cannot possibly be an independent means of cognition different from inference (50-4). Unconditional duty cannot manifest itself in impermanent actions (55). Rituals are actions, and actions are, as a rule, motivated by desire and other passions. Hence, they do not lead to release (56-7). Moreover, one cannot fail to notice (when reading the *Mahābhārata* etc.) how immorally the Gods who proclaim and follow the Veda actually behave. The Vedic gods are vicious and ignorant, and

anything but models of decent behaviour (58-94).

As already pointed out (cf. III. 215-23), the belief in God as creator of the world is fraught with contradictions and absurdities. He is nothing, and he creates absolutely nothing! The true cause of the manifold world is, on the contrary, karma (95-113). One cannot, therefore, overcome the misery of *saṃsāra* by meditating on God (114-9). The Veda-s are also in error when they insist that one can become a good human being by observing rituals such as fast etc. Karma is merely a question of good and bad intentions. Eating meat, for instance, is, in itself, not a sin. One can surely do so without being motivated by any evil intentions (125-38).

The Veda-s are also wrong, for instance when they assume that trees possess consciousness. The growth of plants etc. is also due to karma (139-47). Moreover, one cannot argue that the Veda-s must be authoritative because they are sanctioned by various authors. Even the best authors can make mistakes! Tradition (*āgama*), therefore, is only authoritative to the extent that it satisfies the demands of logic and reason (*anumāna*).

Rational investigation has shown that only the Buddha is reliable and omniscient, in the sense that he knows and propounds the path (*mārga*) to heaven (*svarga*) and liberation (*apavarga*). He, therefore, is the only true Bhagavat. It is not wrong to say that the Nirgrantha-s (Jaina-s) also refute the authority of the

Veda-s using the same arguments as the Buddhist. This, however, does not imply that Buddhists are Jaina-s (148-67).

Chapter X : On the Omniscience of the Buddha. The Nirgrantha-s point out various passages in the Buddhist scriptures that apparently show the Buddha to have been very human, indeed. Many of his actions can only be accounted for by assuming his deep ignorance of the motives of other human beings. Bhavya argues that this is a misunderstanding. The Buddha merely pretended to be ignorant, the reason being that he was motivated by the desire to help ignorant human beings overcome their passions. So he had to play along their lines (*upāyakauśalya*). The Buddha always had a good reason to appear not to be omniscient. For the reasons already given above, the Buddha is, in fact, omniscient (*sarvajña*) (1-14).

Chapter XI : Here, Bhavya summarizes his position. The Buddha is praised for having preached two truths. The true relative truth is a means of achieving the absolute truth.

It is Bhavya's hope, as a scientific author of the *Madhyamakahṛdaya*, to be able to help intelligent students in obtaining *bodhi*. The text itself is described as a *śāstra* that serves as a mirror in which one can see the contents of numerous *sūtra-s* reflected in brief form (1-4).

The Sanskrit Text and Acknowledgment

The present edition of the *MH* is based on the only available Sanskrit MS., or rather, on an excellent photo of the original, now deposited in the China Library of Nationalities (Zhongguo Minzu Tushuguan) in Beijing.

The photographs were first made available to me by Professor Jiang Zhongxin, from the Chinese Academy of Social Sciences, during his stay in Copenhagen in 1987. The first western scholar to avail himself of the photographs was my student Olle Qvarnström, who edited the Vedāntatattvaviniścaya chapter of the *MH* in his book *Hindu Philosophy in Buddhist Perspective*, Lund 1989. A slightly revised edition of the Sanskrit text was published by Qvarnström in *Wiener Zeitschrift für die Kunde Südasiens* 34 (1990), pp. 181-98. The Sanskrit MS., dating from about the eleventh century and written in the so-called proto-Bengali-cum-Maithili (or simply Rañjanā) script of Northern India consists of 24 palm-leaves measuring i.e.: 22½×2 inches, with six or seven lines on *recto* and *verso*. The c. 928 *anuṣṭubh* verses are divided into 11 chapters of unequal length. Parts of chapters VI and VII are missing (about 41 verses, corresponding to one lost leaf, 18). The Tibetan contains a number of verses (about 41 especially in chapter IX) not found in the Sanskrit MS.

The complete MS. was reproduced by Prof. Jiang

Zhongxin as an appendix (12 pages) to the first of two volumes of *Papers in Honour of Prof. Dr. Ji Xianlin on the Occasion of His Eightieth Birthday*, Beijing 1991. The quality of reproduction here is not always quite as good as that of the photographs placed at our disposal in 1987. (Here 3b should be read as 3a, and 3a as 3b.).

As known, the Sanskrit MS. was first discovered in the summer of 1936 by Pandit Ven. Rāhula Sāṃkṛtyāyana in the Zha-lu monastery in Tibet. During his stay there the Pandit made a hand-copy of the MS. Later on he passed this on to Prof. V.V. Gokhale who prepared his own hand-copy. A photographic reproduction of Prof. V.V. Gokhale's personal copy was published by one of his friends and students — also one of our own good friends — Shrikant S. Bahulkar as *The Madhyamakahṛdayakārikā* of Bhāvaviveka (*Nagoya Studies in Indian Culture and Buddhism: Saṃbhāṣā* 15), Nagoya 1994. When Prof. V.V. Gokhale prepared his own copy he could also make use of photgraphs of the MS. taken by G. Tucci. We, too, could also make use of these photographs, thanks to the good offices of Prof. J. Takasaki. Unfortunately, their quality was extremely poor. Likewise, several Japanese scholars have made use of these secondary source-materials (see Bahulkar, *op.cit.*, pp. ii-iv). I myself, at an early stage of this project, also enjoyed the generous assistance of our late friend Prof. V.V. Gokhale who passed away on 5 December, 1991.

My own study of Bhavya started when I prepared my book *Nāgārjuniana* (1982), and had to read through all the Madhyamaka texts still available in Tibetan and Sanskrit. A critical edition of the *MRP* was prepared; some chapters were published, in Tibetan and English. The complete edition still awaits publication.

An excellent translation of six chapters from the *Prajñāpradīpa* was done by my student William L. Ames, when I worked at the University of Washington, in 1986. At the University of Copenhagen, another student, Ms. Annette L. Heitmann, has been working on a critical edition of the first three chapters of the *MH* and *Tarkajvālā* since 1986.

I read chapter V of *MH* / *TJ* together with Dr. Jens-Uwe Hartmann in Göttingen. Prof. Hartmann (now in Munich, kindly compared my edition of *TJ* with the Cone edition, noting its variant readings).

For long I had the plan, together with Malcolm David Eckel, to publish chapters IV and V of *MH* with *TJ*. Our work was, in fact, accepted and almost ready for publication in the Harvard Oriental Series. Then (1995), however, my American colleague changed his mind, thus forcing me to change my original plans.

In 1996 I received a grant from the Danish Research Council in order to complete my own work on the *MH*. As a result of this I could publish a Danish translation of seven chapters of the *MH* (1-5

and 8-9). They appeared in print in my book *Mahāyāna Den senere indiske buddhisme*, Copenhagen 1998, pp. 108-241.

Quite naturally, the many years of study — almost three decades — of the sources of Bhavya (and those of his authorities, mainly Nāgārjuna), brought up numerous new facts and points of view. As a rule, I wanted to form my own opinions, always based on my own reading of the orginal sources. Most of the papers that I have published within the last two decades reflect, in various ways, the results of my study of Bhavya and his sources.

Acknowledgment

The present edition of the Sanskrit text of the *MH*, then, is, as everything else in this world, *pratītyasamutpanna*. Its appearance depends on numerous causes and conditions. I am grateful to all those, who, dead or alive, have made it possible. My aiṃ has been to establish a text that comes as close as possible to the one that I assume left the hands of its learned author (who has by now become an old friend of mine).

Without the constant help of the Tibetan translation of *MH* and *TJ*, I should not have dared to publish my recension of the Sanskrit text. This does not mean that the two are identical. On the contrary, the Tibetan text has its own line of transmission independently of the Sanskrit MS. The translation into Tibetan and the

contamination of its various editions that can be inferred to have taken place in the course of transmission, and errors of various kinds, are of no immediate concern in the present context.

This means that the *apparatus criticus* only reports variants from the Tibetan to the extent that such readings serve to improve the Sanskrit text as such. In a case such as ours I consider it the duty of an editor not to burden the apparatus beyond necessity. Purely orthographical irregularities and obvious scribal lapses are, therefore, not consistently reported. Surely, from a purely palaeographical point of view even such minor errors may occasionally be of some interest. But Bhavya, it is assumed, should not be held responsible for them.

An editor who wishes to establish a critical text of an Indian text available in Tibetan should know sufficient Sanskrit to be able to 'see and hear' the original Sanskrit behind the Tibetan garb. This will, quite often, save him from the error of making 'corrections' in the Tibetan text. Surely, the Tibetans as a rule translated their Sanskrit texts very faithfully. But Sanskrit is also, in all respects, an infinitely richer language than Tibetan. An editor should, therefore, not permit himself to be too much influenced by the Tibetan translation, no matter how admirably it may have been done.

Compared to previous editions of selected chapters of the *MH*, numerous improvements — I hope —

could be made. It goes without saying that the editions of Gokhale (1 and 2), Ejima (3), Qvarnström (8) and Kawasaki (9) facilitated the course of my own work considerably, especially in its earliest stages. These scholars paved the way for me, just as I may expect to have paved the way for other scholars, who, hopefully, will take up the work that still remains to be done in the field of Bhavya studies.

Also, some errors in my own editions of chapters V (1995) and IX (1997) could be corrected. Some of these emendations I owe to the wonderful erudition of my old and dear friend Dr. K.K. Raja, with whom I read, once again, the *MH* in Copenhagen, in May 1999, before the MS. could finally be handed over for publication in India. *Habent sua fata libelli* !

To all those other friends and colleagues who in various ways helped me bring this project to completion, I extend my grateful thanks. These include Olle Qvarnström, Michael Hahn, Karl Potter, Shotaro Iida, Jan W. de Jong, William L. Ames, Georg von Simson, Ernst Steinkellner, Lambert Schmithausen, Bhikkhu Pāsādika, Russell Webb, Carmen Dragonetti, Fernando Tola, Helmut Eimer, A. Wezler, Siglinde Dietz, George Chemparathy, Kameshwar Nath Mishra, Klaus Mylius, the late Daniel H.H. Ingalls, P.S. Jaini, and the late B.K. Matilal. One of my earliest warm supporters was the late Etienne Lamotte. From Japan, Professors Ejima, Kawasaki, Mimaki, Ichigo and Kajiyama

generously provided me with copies of their books and learned papers.

At an earlier stage I received support from the Carlsberg Foundation in Copenhagen. This enabled me not only to bring out several books on Madhyamaka in Danish, but also to invite foreign scholars to Denmark, and to enrich our public libraries with rare and costly Buddhist books.

Most grateful am I to Dr. K. K. Raja, who suggested the publication of Bhavya's *MH* in the Adyar Library Series, and to the Danish Research Council that made it possible by supporting my work with a generous grant.

C. LINDTNER

BIBLIOGRAPHY

Adversaria Buddhica, in *Wiener Zeitschrift für die Kunde Südasiens* 26 (1982), pp. 167-94.

A Note on Vākyapadīya, II.484, in *The Adyar Library Bulletin* 57 (1993), pp. 1-6.

Atiśa's Introduction to the Two Truths, and its Sources, in *Journal of Indian Philosophy* 9 (1981), pp. 161-214.

Bhavya's Controversy with Yogācāra in the Appendix to Prajñāpradīpa, chapter XXV, in *Acta Orientalia Hungarica* 29 (1984), pp. 77-97.

Bhavya's Critique of Yogācāra in Madhyamakaratnapradīpa, in *Buddhist Logic and Epistemology*, Dordrecht (1986), pp. 239-63.

Bhavya, the Logician, in *The Adyar Library Golden Jubilee Volume* 50 (1987), pp. 58-84.

Bhavya's Madhyamakahṛdaya (Pariccheda Five) Yogācāratattvaviniścayāvatāra, in *The Adyar Library Bulletin* 59 (1995), pp. 37-65.

Bhavya, Legs ldan 'byed : Quoting and Quoted, in *Studies in Central and East Asian Religions* 8 (1995), pp. 90-8.

Bhavya on Mīmāṃsā, in *Studia Indologiczne* 4 (1997), Warszawa 1997, pp. 91-123.

Buddhist References to Old Iranian Religion, in *Acta Iranica* 12 (1988), pp. 433-44.

Candrakīrti's Pañcaskandhaprakaraṇa, in *Acta Orientalia* 40 (1979), pp. 87-145.

Cittamātra in Indian Mahāyāna until Kamalaśīla, in *Wiener Zeitschrift für die Kunde Südasiens* 41 (1997), pp. 159-206.

From Brahmanism to Buddhism, in *Asian Philosophy* 9/1 (1999), pp. 5-37.

Linking up Bhartṛhari and the Bauddhas, in *Études Asiatiques* 47

(1993), pp. 195-213.

Madhyamakas Hjerte, in *Mahāyāna. Den senere indiske buddhisme*, København (1998), pp. 108-241.

Madhyamakakārikā-s, in *Encyclopedia of Indian Philosophies*, Volume 8, Delhi (1999), pp. 98-124.

Madhyamaka Causality, in *Horin. Vergleichende Studien zur japanischen Kultur* 6 (1999), pp. 37-77.

Materials for the study of Bhavya, in *Kalyāṇamitrārāgaṇam*. Oxford (1986), pp. 179-202.

Nāgārjuna, in *Companion Encyclopedia of Asian Philosophy*, London and New York 1997, pp. 349-70.

On Bhavya's Madhyamakaratnapradīpa, in *Indologica Taurinensia* 12 (1986), pp. 163-84.

Remarks on the Gauḍapādīya-kārikā-s, in *Indo-Iranian Journal* 28 (1985), pp. 275-9.

Studies on Bhavya, his works, etc. by Chr. Lindtner, 1979-99.

The Laṅkāvatārasūtra in Early Madhyamaka Literature, in *Études Asiatiques* 46 (1992), pp. 244-79.

Yoga in Mahāyāna and Mahāvajrayāna, in *The Esoteric Buddhist Tradition. Selected Papers from the 1989 SBS Conference*, Copenhagen (1994), pp. 1-30.

A full bibliography in now available online : www.lindtner-myhre.dk

CONTENTS

प्रथमः परिच्छेदः

बोधिचित्तापरित्यागः

अप्रतर्क्यमविज्ञेयमनालयमलक्षणम् ।
अनिरूप्यं स्वसंवेद्यमनादिनिधनं शिवम् ।। १ ।।

निर्विकल्पं निराभासं निर्निमित्तं निरञ्जनम् ।
न द्वयं नाद्वयं शान्तं धीप्रचारविवर्जितम् ।। २ ।।

तत्त्वं दिदेश कारुण्याद् यो निरक्षरमक्षरैः ।
भावतोऽस्तु नमस्तस्मै शास्त्रेऽवितथवादिने ।। ३ ।।

महाबोधौ कृतधियां परार्थोदयदीक्षया ।
तत्त्वामृतावताराय शक्तितः किंचिदुच्यते ।। ४ ।।

बोधिचित्तापरित्यागो मुनिव्रतसमाश्रयः ।
तत्त्वज्ञानैषणा चेति चर्या सर्वार्थसिद्धये ।। ५ ।।

बोधिचित्तं महामैत्रीकरुणाज्ञानभूषणम् ।
बुद्धबीजं यतो विद्वांस्तदत्यागाय युज्यते ।। ६ ।।

धीमता सत्त्वमहता परदुःखेऽसहिष्णुना।
सम्यगारब्धवीर्येण युक्तं शक्तिमता सता॥ ७॥

लोकमालोक्य सकलं प्रज्ञालोकतिरस्कृतम्।
संसारामेध्यपातालात् तीर्त्वा तारयितुं स्वयम्॥ ८॥

का वा शक्तिमतः सक्तिर्यदनाथांस्तपस्विनः।
रागादिनिगडैर्बद्धान् घोरे संसारचारके॥ ९॥

प्रमादमदिरां पीत्वा प्रसुप्तान् मोहनिद्रया।
वितर्कतस्कराशेषविलुप्तशुभसंचयान्॥ १०॥

प्रज्ञानिशितनिस्त्रिंशच्छिन्ननिःशेषबन्धनः।
मुक्तो न मोचयेदेनान् यदयं करुणात्मकः॥ ११॥

योऽपि बाहुबलोपात्तं परीत्तं कामजं सुखम्।
एकाकी कृपणो भुङ्क्ते सोऽपि गर्ह्यः सतां भवेत्॥ १२॥

किं पुनश्चक्रवर्तीन्द्रब्रह्मणामपि दुर्लभम्।
अत्यन्ततृष्णाविच्छेदि साधारणमुपायतः॥ १३॥

विग्रहक्षयपर्यन्तदुःखाद्यनभिभावितम्।
निःशेषदुःखशमनं तत्त्वार्थाधिगमामृतम्॥ १४॥

किं च क्लेशग्रहावेशाद् दुःखं दुःखातुरेष्वपि।
कृतं येषु मया पूर्वं क्षतक्षारोपहारवत्॥ १५॥

ये च जात्यन्तरे प्रेमबहुमानोपकारिणः।
तेषां प्रतिक्रिया कान्या निर्वाणप्रापणाद् भवेत्॥ १६॥

न बाध्यन्ते प्रदीप्तासिकल्पैरपि भवैर्बुधाः।
परार्थकरणोद्भूतप्रीतिह्लादितचेतसः॥ १७॥

दौःशील्याक्रियया सर्वदुर्गतिद्वारबन्धनात्।
शून्यतादर्शनाभ्यासात् क्लेशवृत्त्युपघाततः॥ १८॥

कृतपुण्यतयोद्यानयात्रामिव च षड्गतिम्।
पश्यन्तस्त्रासमायान्ति न सन्तो भवचारकात्॥ १९॥

न भवे दोषदर्शित्वात् कृपालुत्वान्न निर्वृतौ।
स्थितास्तिष्ठन्ति च भवे परार्थोदयदीक्षिताः॥ २०॥

भेदाभेदेन संसारनिर्वाणानुपलम्भतः।
न च क्वचन तिष्ठन्ति सर्वत्र च भवे बुधाः॥ २१॥

बोध्यङ्गसप्तरत्नाढ्यं लब्ध्वामितगुणाकरम्।
सद्धर्मचक्रवर्तित्वं सुरासुरनमस्कृतम्॥ २२॥

मुक्ताभेदशरत्पूर्णशशाङ्ककिरणामलैः।
यशोभिश्च वचोभिश्च पूरयित्वा दिशो दश॥ २३॥

त्रिरत्नवंशस्थितये स्थापयित्वा गुणाकरान्।
सत्पुत्रान् देवनागादिचूडामहितशासनान्॥ २४॥

कृतस्वपरकार्यत्वान्निर्वृतास्ते सुनिर्वृताः ।
अतोऽन्ये स्कन्धविच्छेदादुच्छिन्नास्तेऽपि निर्वृताः ॥ २५ ॥
न क्रोष्टा मत्तमातङ्गकुम्भास्फालनपाटने ।
न मातङ्गः समुद्रान्तमहीमण्डलपालने ॥ २६ ॥
गम्भीरानुत्तरोदारसंख्यातीतगुणाकरे ।
न हीनसत्त्वो बुद्धत्वे मनोरथमपीच्छति ॥ २७ ॥
अप्रमेयाद्भुताचिन्त्यसर्वदीप्त्यतिभाविषु ।
संबुद्धगुणरत्नेषु कः कुर्वीत न मानसम् ॥ २८ ॥
कः परार्थक्रियाशूरो महापुरुषचेष्टितैः ।
नानन्तमपि संसारं तिष्ठेदेकमहो यथा ॥ २९ ॥
कः परार्थैककार्याणामार्याणां पद्धतिं कृती ।
नानुयायादतीतोऽपि यत् कथावस्तुतां व्रजेत् ॥३० ॥
कोऽसौ परहिताधानसाधनीकरणात् तनुम् ।
न नयेत् कदलीफेननिःसारं मेरुसारताम् ॥ ३१ ॥
प्रतिक्षणं जरामृत्युरुजामाश्रयमाश्रयम् ।
करोति धन्यः कारुण्यात् परसौख्योदयाश्रयम् ॥ ३२ ॥
ससद्धर्मप्रदीपो हि प्रणष्टाष्टाक्षणः क्षणः ।
सफलीकरणीयोऽयं महापुरुषचर्यया ॥ ३३ ॥

बोधिचित्तापरित्यागो नाम प्रथमः परिच्छेदः

द्वितीयः परिच्छेदः

मुनिव्रतसमाश्रयः

एवं दृढमहाबोधिसमादानो जगद्धिते ।
प्रतिरूपं प्रतिपदं प्रतिपन्नो विराजते ॥ १ ॥

स मैत्र्याप्रतिघातिन्या कारुण्येन प्रसर्पिणा ।
सद्धर्माधिगमातृप्तो धर्मदाने विमत्सरः ॥ २ ॥

ऋजुनाहतमानेन मनसा तत्त्वदर्शिना ।
परदोषेक्षणान्धेन स्वदोषापत्तिभीरुणा ॥ ३ ॥

विवादलोकसंसर्गलोकायतपराङ्मुखः ।
निर्गुणेऽपि गुणाधानप्रततः स्रंसितादरः ॥ ४ ॥

कृपोद्भूतेन दानेन सर्वज्ञत्वगतस्पृहः ।
सर्वस्य जनकायस्य सर्वदुःखोपशान्तये ॥ ५ ॥

शीलामलजलस्नायी क्षमासितपवित्रकः ।
वीर्यबद्धजटाभारो ध्यानज्ञानपरायणः ॥ ६ ॥

समुन्मिषितधीनेत्रः शास्त्रलोकज्ञतापटुः ।
ह्रीव्यवत्राप्यवसनः सौरत्यतनुबन्धनः ॥ ७ ॥

कृपाकृष्णाजिनधरः श्रद्धामलकमण्डलुः ।
स्मृतिगुप्तेन्द्रियद्वारो धृतिवेत्रासनासनः ॥ ८ ॥

महायानमहारम्यतपोवनसमाश्रयः ।
ध्यानप्रीतिफलाहारः स्मृत्युपस्थानगोचरः ॥ ९ ॥

गम्भीरोदारसूत्रान्तस्वाध्यायहतकिल्बिषः ।
प्रतीत्योत्पादसावित्रीं जपन् सत्यद्वयाश्रयात् ॥ १० ॥

वर्णाढ्यैः प्रतिपत्पुष्पैः सर्वदिग्गन्धवाहिभिः ।
उपासीनस्त्वहरहः सम्यक्संबुद्धभास्करम् ॥ ११ ॥

हुताकुशलसंकल्पः प्रतिसंख्यानपावके ।
मुनिव्रतं चरेदेवमनुत्तरपदाप्तये ॥ १२ ॥

मुनिव्रतसमाश्रयो नाम द्वितीयः परिच्छेदः

तृतीयः परिच्छेदः

तत्त्वज्ञानैषणा

यस्य ज्ञानमयं चक्षुश्चक्षुस्तस्यास्ति नेतरत् ।
यतस्तस्माद् भवेद् धीमांस्तत्त्वज्ञानैषणापरः ।। १ ।।

पश्यत्यन्धोऽपि मतिमान् दिदृक्षुर्विप्रकृष्टकान् ।
सूक्ष्मव्यवहितानर्थांस्त्रैलोक्याहतदर्शनः ।। २ ।।

सहस्रेणापि नेत्राणामनेत्रो बुद्धिवर्जितः ।
स्वर्गापवर्गसद्भूतमार्गामार्गासमीक्षणात् ।। ३ ।।

दृष्टादृष्टविशिष्टेष्टफलाशाविषकण्टके ।
प्रवर्तते न दानादौ प्रज्ञोन्मीलितलोचनः ।। ४ ।।

त्रिमण्डलविशुद्धे हि दानादावभियुज्यते ।
कारुण्यात् सर्ववित्त्वाय तत्राप्यस्थितमानसः ।। ५ ।।

प्रज्ञामृतं तृप्तिकरं दीपोऽप्रतिहतप्रभः ।
मोक्षप्रासादसोपानं क्लेशेन्धनहुताशनः ।। ६ ।।

सा च सत्यद्वयापेक्षा द्विविधाभिमता मतिः ।
तथ्यसंवृतिभूतार्थप्रविवेकानुगुण्यतः ॥ ७ ॥

दानादिपुण्यज्ञानाख्यसंभारपरिपूरणे ।
तद्धेतुफलसंबन्धलक्षणादिविनिश्चये ॥ ८ ॥

महामैत्रीकृपाभ्याससत्त्वसंग्रहपाचने ।
प्रज्ञा सांकेतिकी ज्ञेया द्वादशायतनाश्रया ॥ ९ ॥

अशेषकल्पनाजालप्रतिषेधविधायिनी ।
शान्तप्रत्यात्मसंवेद्यनिर्विकल्पनिरक्षरे ॥ १० ॥

विगतैकत्वनानात्वे तत्त्वे गगननिर्मले ।
अप्रचारप्रचारा च प्रज्ञा स्यात् पारमार्थिकी ॥ ११ ॥

तत्त्वप्रासादशिखरारोहणं न हि युज्यते ।
तथ्यसंवृतिसोपानमन्तरेण यतस्ततः ॥ १२ ॥

पूर्वं संवृतिसत्येन प्रविविक्तमतिर्भवेत् ।
ततो धर्मस्वसामान्यलक्षणे सुविनिश्चितः ॥ १३ ॥

अभियुज्येत मेधावी समाधानाय चेतसः ।
तथा श्रुतमयज्ञाने तदन्यज्ञानहेतुतः ॥ १४ ॥

न पश्यति यथा वक्त्रं कलुषप्रचले जले ।
तथासमाहिते चित्ते तत्त्वं निवरणावृते ॥ १५ ॥

निबध्यालम्बनस्तम्भे स्मृतिरज्ज्वा मनोगजम् ।
उन्मार्गचारिणं कुर्यात् प्रज्ञाङ्कुशवशं शनैः ॥ १६ ॥

अनित्यतामनस्कारैरुद्धतं शममानयेत् ।
विपुलालम्बनाभ्यासात् संक्षिप्तं विपुलात्मताम् ॥ १७ ॥

विक्षिप्तं संहरेत् क्षिप्तनिमित्तादीनवेक्षणात् ।
वीर्यानुशंसदर्शित्वाल्लीनमुत्तेजयेदपि ॥ १८ ॥

रागद्वेषमोहपङ्कमलीमसमसंयतम् ।
क्षालयेदशुभामैत्रीप्रतीत्योत्पादवारिणा ॥ १९ ॥

विविक्तमचलं शान्तमालम्बनपरायणम् ।
कर्मण्यं मृदु च ज्ञात्वा तत्र सम्यगुपेक्षयेत् ॥ २० ॥

समाहितमतिः पश्चात् प्रज्ञयैवं परीक्षयेत् ।
योऽयं स्वभावो धर्माणां गृह्येत व्यवहारतः ॥ २१ ॥

विचार्यमाणस्तु धिया किमयं परमार्थतः ।
यदि स्यात् तत्त्वमेवायमतोऽन्यश्चेत् स मृग्यते ॥ २२ ॥

न पक्षपातसंतप्तः शान्तिमर्हति च क्वचित् ।
संस्कृतासंस्कृता धर्माः स्कन्धायतनधातवः ॥ २३ ॥

क्लेशावरणहानाय श्रावकाणां प्रकाशिताः ।
क्लेशज्ञेयावृतिमलप्रहाणाय कृपात्मनाम् ॥ २४ ॥

औदारिकत्वात् प्रथमं रूपस्कन्धः परीक्ष्यते ।
तत्रापि पूर्वं भूतानि यथोक्तादेव कारणात् ॥ २५ ॥

अत्र भूतस्वभावं हि नोर्व्यादि परमार्थतः ।
कृतकत्वाद् यथा ज्ञानं हेतुमत्त्वादितोऽपि वा ॥ २६ ॥

खरस्वभावा न मही भूतत्वात् तद्यथानिलः ।
धारणं न भुवः कार्यं कृतकत्वाद् यथाम्भसः ॥ २७ ॥

खरस्वभावा यद्युर्वी तत्त्वतोऽप्यसती मता ।
योगिनस्तत्र युज्येते नोन्मज्जननिमज्जने ॥ २८ ॥

ध्यायिनां ध्यानसामर्थ्यान्न युक्ता द्रवता क्षितेः ।
स्वभावस्यानपायित्वान्न वास्याः कठिनात्मता ॥ २९ ॥

एवं जलानिलाग्नीनां न द्रवादिस्वभावता ।
युज्यते नापि तत्कार्यं संग्रहव्यूहपक्तयः ॥ ३० ॥

न हि तुल्यगुणा नेष्टाः संवृत्या पवनादयः ।
कायेन्द्रियोपलभ्यत्वाद् भूतत्वाद् वापि भूमिवत् ॥ ३१ ॥

द्रव्यसन्न पृथिव्यादि सामग्रयङ्गाग्रहेऽग्रहात् ।
यद् यथोक्तं न तद् दृष्टं द्रव्यसत् तद्यथा वनम् ॥ ३२ ॥

द्रव्यसद्विषया चेयं न क्षित्यादिमतिर्मता ।
सकारणत्वान्नाशाद् वा तद्यथा काननादिधीः ॥ ३३ ॥

द्रव्याभिधायको नेष्टो ध्वनिः क्षित्यादिवाचकः ।
श्रावणत्वाद् यथा नेष्टो ध्वनिः सेनादिवाचकः ।। ३४ ।।

नानैकान्तिकता हेतोश्चित्तचैतसबुद्धिभिः ।
जायते साध्यतुल्यत्वं तद्वत्तत्प्रतिषेधतः ।। ३५ ।।

नारम्भका वनस्येष्टाः पलाशस्पन्दनादयः ।
हेतुमत्त्वादिहेतुभ्यस्तद्यथा चरणादयः ।। ३६ ।।

पलाशादिभिरारब्धो न वनोऽवयवी मतः ।
प्रत्येकमसमाप्तत्वात् तेषु यद्वत् करादिभिः ।। ३७ ।।

अतो दृष्टान्तदोषोऽपि न पक्ष उपपद्यते ।
द्वितीयेऽपि यथा नास्ति तथेदमभिधीयते ।। ३८ ।।

नानेकानियतद्रव्यसंख्यावृत्तिर्वनध्वनिः ।
विशिष्टबुद्धिहेतुत्वाद् घटकुण्डादिशब्दवत् ।। ३९ ।।

न चक्षुरिन्द्रियग्राह्यं रूपं हि परमार्थतः ।
संघातत्वाद् यथा शब्दो भौतिकत्वात् तथापि वा ।। ४० ।।

न चक्षुः प्रेक्षते रूपं भौतिकत्वात् स्वरूपवत् ।
सुखाद्युत्पत्तिहेतुत्वाद् वाच्यत्वाद् वा रसादिवत् ।। ४१।।

तथा न भौतिकं रूपमुत्पत्तेर्ज्वलनादिवत् ।
हेतुमत्त्वादिहेतुभ्यश्चित्तवद् वेति लक्षयेत् ।। ४२ ।।

एतेन वर्णसंस्थानसंचितत्वादिलक्षणः ।
सूक्ष्मौदारिकभेदश्च यावान् रूपस्य कल्पितः ॥ ४३ ॥

प्रतिषिद्धोऽवबोद्धव्यो यथायोगप्रयोगतः ।
शब्दगन्धरसस्पर्शप्रतिषेधेऽप्ययं नयः ॥ ४४ ॥

न चक्षुरिन्द्रियं रूपमीक्षते परमार्थतः ।
चित्तचैतसिकान्यत्वात् तद्यथा रसनेन्द्रियम् ॥ ४५ ॥

न रूपमीक्षते चक्षुरथवा परमार्थतः ।
अविज्ञानस्वभावे सत्यनुत्पत्तेस्त्वगादिवत् ॥ ४६ ॥

न वर्णविषयो रूपप्रसादश्चक्षुरिन्द्रियम् ।
कृतकत्वादिहेतुभ्यो दृष्टान्ताश्च त्वगादिकाः ॥ ४७ ॥

न चक्षू रूपविषयं स्वरूपाग्रहणान्मतम् ।
श्रवणादीन्द्रियं यद्वद् रूपित्वाद् वा रसादिवत् ॥ ४८ ॥

तद्वद् वाचक्षुषो द्रष्टुर्दर्शनं नानिदर्शनम् ।
कथं वाद्रष्टृरूपस्य युज्यते रूपदर्शनम् ॥ ४९ ॥

कथं वाद्रष्टृरूपस्य युज्यते रूपदर्शनम् ।
द्रष्टैव चेद् भवेच्छ्रोता श्रोतृत्वं तस्य किंकृतम् ॥ ५० ॥

न चादेयविशेषत्वादिष्टे तज्ज्ञत्वनित्यते ।
न चैकत्वं द्विरूपत्वाद् देहान्तरशरीरवत् ॥ ५१ ॥

रूपोपलब्धौ करणं नेष्यते चक्षुरिन्द्रियम् ।
अमनस्त्वे सति द्रष्टुरन्यत्वाच्छ्रवणादिवत् ॥ ५२ ॥

न चास्य द्रष्टृता युक्ता चक्षुरादिव्यपेक्षणात् ।
मनोवत् परिणामित्वात् प्रतिबिम्बोदयात् तथा ॥ ५३ ॥

अक्षान्तरेण वादृष्टेर्मनोवद् द्रष्टृता कथम् ।
मनसस्तत्त्वतो नेष्टमात्मवद् रूपदर्शनम् ॥ ५४ ॥

अद्रव्यसत्त्वात् सामग्र्यास्तद्वद् वा नास्ति दर्शनम् ।
धर्मान्तराभिनिर्वृत्तेर्घण्टावत् कर्तृतास्तु वा ॥ ५५ ॥

न चक्षू रश्मिवद् युक्तमक्षत्वादितराक्षवत् ।
नक्तंचराक्ष्यधिष्ठानं दृश्यं दृश्यं न हीक्षणम् ॥ ५६ ॥

न सुखाद्यात्मकं चक्षुर्वस्तुत्वात् तद्यथा पुमान् ।
नापि सर्वगतं चक्षुः सत्त्वात् तद्गोलकादिवत् ॥ ५७ ॥

अथवासर्वगन्त्रक्षि पारार्थ्यात् तद्यथा घटः ।
रूपोपलब्धिहेतुत्वाद् यथा रूपं तथेति वा ॥ ५८ ॥

न चक्षुस्तेजःसंयुक्तमिन्द्रियत्वात् त्वगादिवत् ।
तेजोऽधिकं महाभूतप्रसादाद्यात्मकं न च ॥ ५९ ॥

न प्राप्तविषयं चक्षुरिन्द्रियत्वाद् यथा मनः ।
रूपवत् कारणत्वाद् वा हेतुमत्त्वात् तथापि वा ॥ ६० ॥

बाह्यार्थग्रहणात् साक्षादतीतानागताग्रहात् ।
न प्राप्तविषयग्राहि घ्राणादीष्टं यथेक्षणम् ।। ६१ ।।

साध्यतुल्यनिषेधाच्च नानेकान्तस्त्वगादिभिः ।
नयेनानेन बोद्धव्यं प्रत्युक्तं श्रवणाद्यपि ।। ६२ ।।

त्रयं नाप्राप्तविषयं मनःश्रोत्राक्षिलक्षणम् ।
इन्द्रियत्वाद् यथा घ्राणं चित्तहेतुत्वतोऽपि वा ।। ६३ ।।

दर्शनेनैव बोद्धव्या यथाकथितविस्तरात् ।
श्रवणघ्राणरसनत्वगिन्द्रियनिराक्रियाः ।। ६४ ।।

sgra daṅ dri daṅ ro daṅ reg /
dgag pa'i tshul yaṅ de yin te //
mkhas pas gzu bo'i blo dag gis /
ci rigs par ni śes par bya // 65 //

न युक्ता परमार्थेन वेदनानुभवात्मिका ।
विज्ञानसंप्रयुक्तत्वात् तदन्ये चैतसा यथा ।। ६६ ।।

सुखानुग्राहिका नेष्टा स्पर्शजत्वात् तदन्यवत् ।
यथोक्तहेतोर्विज्ञेया न दुःखा पीडनात्मिका ।। ६७ ।।

नेष्टादुःखासुखा तद्वत् तृट्फलत्वाद् यथेतरा ।
विवक्षिताद् वा विज्ञानस्वभावप्रतिषेधतः ।। ६८ ।।

एतेन संज्ञा व्याख्याता संस्काराश्चोभयात्मकाः ।
mkhas pas gzu bo'i blo dag gis /
ci rigs par ni śes par bya // 69 //

न वस्तुप्रतिविज्ञप्तिस्वभावं तत्त्वतो मनः ।
सालम्बनत्वात् संज्ञावन्नाशित्वाद् वा प्रदीपवत् ।। ७० ।।

phuṅ po lṅa po rnam dpyad pa'i /
sgrub pa ji skad bstan pa des //
स्कन्धैस्तु धातवो ज्ञेया ज्ञेयान्यायतनानि च ।। ७१ ।।

नैवोत्पादादयो युक्ताः संस्कृतत्वेन लक्षणम् ।
संस्कृतत्वाद्धि लक्ष्यस्य बोध्यत्वाच्च तदन्यवत् ।। ७२ ।।

नापि लक्षणसद्भावाद् भावानां सात्मता मता ।
विरुद्धोऽपि हि हेतुः स्यादसिद्धार्थोऽपि वा यतः ।। ७३ ।।

काठिन्यं लक्षणं मह्या न महीत्वेन युज्यते ।
कायविज्ञानहेतुत्वादग्नित्वे लक्षणं कथम् ।। ७४ ।।

glaṅ gi mtshan ñid glaṅ ñid kyis /
nog daṅ lkog śal sogs mi 'dod //
khyad par can gyi blos brtag phyir /
dper na boṅ bu'i mtshan ñid bshin // 75 //

gcig na ji ltar mtshan ñid yin /
des ni de ñid mi mtshon phyir //
gshan na ji ltar mtshan ñid yin /
gshan gyis gshan ñid mi msthon phyir // 76 //

अगते परमार्थेन न गतिः संप्रतीयते ।
अध्वत्वाद् गत्यभावाद् वा तदन्यस्मिन् यथा गते ॥ ७७ ॥

गतागतविनिर्मुक्तगम्यमानानिरूपणात् ।
न गम्यमाने गमनं ज्ञायते परमार्थतः ॥ ७८ ॥

गतागतत्वावाच्येऽपि गम्यमाने गतिर्न च ।
अध्वत्वात् तद्यथातीते यथा वानागतेऽध्वनि ॥ ७९ ॥

गत्यसिद्धेर्न गन्तास्ति नागतिर्गच्छतीष्यते ।
अगन्तुर्न गतिर्युक्ता गत्ययोगाद् यथा पुरा ॥ ८० ॥

स्वतोऽर्थान्तरसंबन्धे गन्तेतीयं मतिर्मता ।
दण्डिवन्नान्वयाभावाद् बुद्धिशब्दानुवृत्तितः ॥ ८१ ॥

निरन्तरदिगुत्पादिसंस्कारप्रसराश्रया ।
ज्वालादिवद् गतिभ्रान्तिः सांवृती सा न तत्त्वतः ॥ ८२ ॥

अद्रव्यत्वात् कलापस्य निरीहत्वादथापि वा ।
न गन्तृकल्पना न्याय्या कापिलैः परमार्थतः ॥ ८३ ॥

द्रव्यसन् समुदायश्चेत् समुदाय्यग्रहेऽग्रहात् ।
तदात्मवद्युक्तं तत् तेषामद्रव्यसत्त्वतः ॥ ८४ ॥

शेषक्रियानिषेधेऽपि दिगेषा प्रतिपादिता ।
संसारमोक्षसद्भावादिष्टा चेत् सस्वभावता ॥ ८५ ॥

यथाविकल्पितं रूपं यदैषां नावधार्यते ।
तदा निरूप्य रूपाणां बन्धमोक्षौ कुतः कथम् ॥ ८६ ॥

युज्येते निःस्वभावेषु मायास्वप्नोपमेषु तु ।
स्वहेतुप्रत्ययवशाद् विशिष्टेष्वात्मलाभिषु ॥ ८७ ॥

नामरूपस्य संसारो न युक्तः परमार्थतः ।
संस्कृतत्वात् पृथिव्यादेर्यथा बाह्यस्य नेष्यते ॥ ८८ ॥

न मुच्यते नामरूपं कथंचित् परमार्थतः ।
उत्पत्तिमत्त्वान्नाशाद् वा यथा बाह्यं जलादिकम् ॥ ८९ ॥

न पुद्गलः संसरति मुच्यते न च तत्त्वतः ।
प्रज्ञप्यत्वाद् यथा वेश्म वाच्यत्वाद् वापि गन्धवत् ॥ ९० ॥

निष्पुद्गला वा संस्कारा हेतुमत्त्वाद् यथा घटः ।
उत्पत्तिमत्त्वान्नाशित्वाज्ज्ञेयत्वाद् वापि लोष्टवत् ॥ ९१ ॥

द्रव्यसन्नाप्यवाच्यत्वाद् गन्धवत् पुद्गलो मतः ।
श्यामगौरतयावाच्यवन्ध्यापुत्रेण संशयेत् ॥ ९२ ॥

एवं निरात्मकाः स्कन्धा निर्जीवाः सत्त्ववर्जिताः ।
mkhas pas gzu bo'i blo dag gis /
ci rigs par ni śes par bya // 93 //

शरीरेन्द्रियसंघातो निरात्मा तत्त्वतो मतः ।
हेतुमत्त्वाद् यथा स्तम्भः प्रचयाद् वापि नाकुवत् ।। ९४ ।।

स्मरणप्रत्यभिज्ञानज्ञानोत्पादादिहेतुभिः ।
आत्मसत्ताप्रतिज्ञाने हेतूनां स्यादसिद्धता ।। ९५ ।।

सेन्द्रियः सात्मको देह इत्येवं चेत् प्रसाध्यते ।
असाधारणतैवं स्याद् हेतूनामन्वयादृते ।। ९६ ।।

आत्मशब्दो यथार्थोऽयं क्वचित् तदुपचारतः ।
तद्यथा सिंहशब्दश्चेन्नैवमात्मा प्रसिध्यति ।। ९७ ।।

अथ विज्ञानविषयो यथार्थोऽन्यत्र साध्यते ।
नित्यसर्वगतत्वादिविरोधात् स्याद् विरुद्धता ।। ९८ ।।

बन्धमोक्षावतो नेष्टौ कस्यचित् परमार्थतः ।
soṅ daṅ ma soṅ bgom pa yis /
de bshin sems la lhag ma bśad // 99 //

उत्पन्नं हि यदा चेतो विनाशाभिमुखं तदा ।
रञ्जनं कस्य केनेष्टं रक्तं नष्टं न चेष्यते ।। १०० ।।

रज्यते जायमानं चेत् तत् किं जन्मोन्मुखं यदि ।
निराश्रयक्रियायोगात् तदजातस्य नेष्यते ।। १०१ ।।

skye bshin skyes daṅ ma skyes par /
brjod pa min la'aṅ chags pa med //
अवाच्यमप्यवाच्यत्वाच्चित्तं रक्तं न रागवत् ।। १०२ ।।

सक्त्याकारेण चेज्ज्ञातं चित्तं रक्तमितीष्यते ।
रक्तस्फटिकधीवत् स्यात् तद्बुद्धिरक्तता कथम् ।। १०३ ।।

तदेवं रञ्जनाभावात् सांवृती रागकल्पना ।
'dod chags bshin du chos rnams kun /
ci rigs par ni śes par bya // 104 //

भावो द्रव्याश्रयो युक्तः स च तस्मान्न भिद्यते ।
रागस्येव न ते रक्तिश्चेतसोऽपि प्रसज्यते ।। १०५ ।।

न रागस्यान्यता युक्ता रक्तस्याग्रहणेऽग्रहात् ।
रक्तात्मवत् पृथक्त्वेऽपि नान्यवत् तेन रक्तता ।। १०६ ।।

न वस्तुप्रतिविज्ञप्ते रागाद् भेदोऽस्ति चेतसः ।
आलम्बनादितुल्यत्वान्न चान्यद् भेदकारणम् ।। १०७ ।।

तस्मात् समुदयस्येष्ट एकेन समुदायिना ।
स्वोत्पत्त्यपेक्षो निर्देशो यथा कुसुमिते तरौ ।। १०८ ।।

तत्प्रहाणान्न निर्वाणं युज्यते तदयोगतः ।
mya ṅan 'das pa don dam du /
dṅos daṅ dṅos med
mtshan ñid min // 109 //

भावो हि यदि निर्वाणं भावत्वात् संस्कृतं हि तत् ।
संस्कृतत्वाद् विपक्षोऽपि न संस्कृतनिरोधवत् ॥ ११० ॥

अभावो यद्यभावत्वान्नाशित्वाद् यः पराश्रयात् ।
नेष्टश्च प्रतिपक्षोऽसौ नाशितावत् पराश्रयः ॥ १११ ॥

असंस्कृतोऽप्ययुक्तोऽसौ पूर्वोक्तप्रतिषेधतः ।
चितेर्विशेषः कश्चास्य मुक्तात् सांख्यप्रकल्पितात् ॥११२ ॥

स्वरसक्षयिनः क्लेशा विकल्पारणिसंभवाः ।
तेषामसंचितेः केषां क्षयान्मोक्षोऽस्तु तेऽक्षयः ॥ ११३ ॥

अजातानां तथासत्त्वात् कल्पनायाः समो नयः ।
वद कस्य क्षयान्मोक्षः क्षयिनोऽक्षयिनोऽपि वा ॥ ११४ ॥

स्वभावशून्यताबोधान्निवृत्तेस्तन्मतेरपि ।
अक्षयाक्षयिधर्मत्वं प्राप्नोत्यप्राप्तियोगतः ॥ ११५ ॥

नात्मकामाः श्रयन्तीमा यथाभूतपरीक्षकाः ।
कुदृष्ट्यामयदुर्गन्धसक्तोद्गारा गिरस्ततः ॥ ११६ ॥

न विपर्याससद्भावात् सद्भावस्तस्य युज्यते ।
रागतुल्यविचारत्वात् तत्क्लृप्तिरपि सांवृती ।। ११७ ।।

प्रागेव चित्तचैत्तानां स्वभावप्रतिषेधतः ।
रागो रागस्वभावेन न च यत् तेन रज्यते ।। ११८ ।।

एतेन द्वेषमूढादि प्रत्युक्तं प्रतिभावयेत् ।
ततश्च बन्धनासिद्धेरचला निःस्वभावता ।। ११९ ।।

नेष्टा मह्यात्मनोऽनन्या पृथिवी परमार्थतः ।
हेतुमत्त्वाद् यथा वायुर्वस्तुत्वाद् वापि बोधवत् ।। १२० ।।

नान्यत् पृथिव्या सलिलं गृह्यते परमार्थतः ।
उत्पत्तिमत्त्वादुर्व्यात्मा यथोर्व्या न पृथक् तथा ।। १२१ ।।

नापि तद्ध्वनिधीभेदात् क्षित्यादीनां मतान्यता ।
कार्यलक्षणभेदाद् वा साध्यधर्मासमन्वयात् ।। १२२ ।।

रूपस्यात्मेत्यभेदेऽपि व्यपदेशाच्च संशयः ।
परिकल्प्यस्य चासिद्धेरसिद्धार्थो भवेदसौ ।। १२३ ।।

शब्दादिभेदभिन्नेऽपि तस्मात् ते व्यभिचारिणः ।
विशेषणाभिधानेऽपि निवार्यन्ते विरोधिना ।। १२४ ।।

उभयत्वं विरोधाच्च यथाग्नेरुष्णशीतते ।
अन्यानन्यत्वपक्षोक्तनिषेधाद् वा तदप्यसत् ।। १२५ ।।

द्व्यात्मकत्वेऽपि सर्वस्य प्रसिद्धोऽंशो निदर्शनम् ।
दृष्टान्तन्यूनता तस्मान्न परं प्रति जायते ॥ १२६ ॥

आपेक्षिकी च तत्सिद्धिर्मनोरथविकल्पिता ।
द्वयोरन्यतरस्यापि प्रागसिद्धेर्न सिध्यति ॥ १२७ ॥

सर्वेषूभयवादेषु प्रतिषेधेऽप्ययं नयः ।
एवं यथोक्तविधिना निषिद्धा सस्वभावता ॥ १२८ ॥

इत्येते संस्कृता धर्माः साहसेन विचारिताः ।
असंस्कृता निरोधौ द्वावाकाशं तथता तथा ॥ १२९ ॥

प्रतिसंख्यानिरोधो हि न भावः परमार्थतः ।
नित्याविकृतरूपत्वाद् वन्ध्यातनयमूर्तिवत् ॥ १३० ॥

अजातत्वादभेदत्वादकार्यत्वादथापि वा ।
संस्कृतासंग्रहाद् वापि निरोधासंभवादपि ॥ १३१ ॥

यच्च कार्यं मतं यस्य न हि तत् तस्य कारणम् ।
अजातत्वादिहेतुभ्यो हस्तिमस्तकशृङ्गवत् ॥ १३२ ॥

अजातकारणं नेष्टं कार्यमित्यवसीयते ।
कार्यत्वात् तद्यथा क्षुद्रं न खपुष्पादिकारणम् ॥ १३३ ॥

एतेन व्योमतथतादिक्कालात्मादि बुद्धिमान् ।
प्रतिषिद्धं विजानीयाद् यावत् किंचिदसंस्कृतम् ॥ १३४ ॥

द्रव्यप्रधानजीवादि ज्ञेयं यत् तीर्थ्यकल्पितम् ।
यथायोगं निषेद्धव्यं युक्त्यागमविशारदैः ॥ १३५ ॥

इति स्वपरसिद्धान्तकल्पितात्मनिरात्मताम् ।
विद्वान् विभाव्य भावानां तत्त्वज्ञानामृतं पिबेत् ॥ १३६ ॥

अथवा कल्पनाजालप्रसरो ह्येवमादिकः ।
जातभावाश्रयो बालमाकुलीकुरुते बलात् ॥ १३७ ॥

विद्वान् विद्याप्रदीपेन यथाभूतं परीक्षते ।
जातेर्निषेधात् तच्छान्तेः प्रपञ्चोपशमस्तदा ॥ १३८ ॥

तत्र तावत् स्वतो जन्म संवृत्यापि न युज्यते ।
सात्मकत्वाद् यथा दध्नः स्वतो जन्म न विद्यते ॥ १३९ ॥

नोत्पन्नाः स्वात्मतो भावा भावत्वात् तद्यथा पुमान् ।
नापि चात्मास्त्यजातानामजातत्वात् खपुष्पवत् ॥ १४० ॥

खपुष्पाभाववाच्यं हि खादि यद्यपि ते मतम् ।
न खपुष्पं तद् इत्यस्मात् पक्षेऽपि न्यूनता न नः ॥ १४१ ॥

कार्यस्य कारणं स्वात्मा तस्य जन्म ततो मतम् ।
स्वतो जन्म ततोऽभीष्टं भावानामिति चेन्मतम् ॥ १४२ ॥

स्वात्मवत् तदनन्यत्वात् कारणं स्यादकारणम् ।
अजातत्वाच्च किं कस्य कारणं स्यादकारणम् ॥ १४३ ॥

सत्यात्मनि च भावस्य वृथा कारणकल्पना ।
तस्मादेव तदुत्पन्नं चैक्यं जनकजन्ययोः ॥ १४४ ॥

दधिभावेन पयसोऽवस्थानाच्चेदबाधकम् ।
पुत्रत्वेनानवस्थानात् पितुर्न हि न बाधकम् ॥ १४५ ॥

विपक्षासंभवादिष्टा नापि हेतोर्विरुद्धता ।
एवं तावत् स्वतो जन्म भावानां नोपपद्यते ॥ १४६ ॥

स्वभावासंभवाच्चापि कः कस्मात् पर इष्यते ।
न गोशृङ्गाद्रिशृङ्गत्वं वाजिशृङ्गं परं मतम् ॥ १४७ ॥

न परे परमार्थेन प्रत्ययाश्चक्षुरादयः ।
चक्षुर्विज्ञानजनकाः परत्वाद् वीरणादिवत् ॥ १४८ ॥

न विवक्षितनेत्रादिकारणा रूपधीर्मता ।
परत्वात् प्रागसत्त्वाद् वा यथा घटपटादयः ॥ १४९ ॥

अजातस्य परत्वं च सांवृतं न तु तत्त्वतः ।
परस्मादपि जन्मैवमयुक्तमिति गृह्यते ॥ १५० ॥

अनिर्देश्यस्य चोत्पत्तिरुत्पन्नस्य निरर्थिका ।
नापि जातिरजातस्य खपुष्पवदजातितः ॥ १५१ ॥

जायमानस्य चोत्पत्तौ तुल्यपर्यनुयोगिता ।
अवाच्यस्याप्यवाच्यत्वात् तदन्यवदसंभवः ॥ १५२ ॥

विकल्पितात्मना शून्यास्तत्त्वतश्चक्षुरादयः ।
कृतकत्वाद् विनाशाद् वा यथा मायामयं पयः ॥ १५३ ॥

साध्यतुल्यनिषेधाच्च संशयो नेतरात्मना ।
अकल्पितोऽपि मायात्मा वितथस्तत्त्वतो मतः ॥ १५४ ॥

स्वात्माभिमतिहेतुत्वाद् यथासौ कल्पितात्मता ।
प्रतीतांशेन तत्सिद्धेर्दृष्टान्तन्यूनता न नः ॥ १५५ ॥

स्वभावशून्या ह्यथवा तत्त्वतश्चक्षुरादयः ।
कृतकत्वाद् विनाशाद् वा मारनिर्मितबुद्धवत् ॥ १५६ ॥

यश्च स्वभावो भावानां स्वभावोऽसौ न तत्त्वतः ।
कृतकत्वाद् यथोष्णत्वम् अम्भसः स्थिरतापि वा ॥ १५७ ॥

स्वात्मनैव हि भावानामुत्पादो नोपपद्यते ।
परभावेन चोत्पादो न दृष्टो गोः खरात्मना ॥ १५८ ॥

हेत्वादिप्रत्ययेभ्यश्च परेभ्यो जन्म सांवृतम् ।
नातोऽभ्युपेतबाधितास्तत्त्वतो हि न ते यतः ॥ १५९ ॥

न सतो नासतो युक्तः प्रत्ययः सदसत्त्वतः ।
तदन्यवदजातेर्वा प्रत्ययः प्रत्ययः कुतः ॥ १६० ॥

न हेतुः कार्यजनकस्तच्छून्यत्वात् तदन्यवत् ।
नापि तज्जन्मतोत्पित्सोः प्रागसत्त्वात् तदन्यवत् ॥ १६१ ॥

नाजातं जायमानं वा जातं वा जनयत्ययम् ।
उक्तदोषादजातेश्च तस्माद्धेतुर्न तत्त्वतः ॥ १६२ ॥

जातस्यालम्बनायोगो जाते जातिर्वृथा यतः ।
अजातस्याप्यजातत्वाद् यथानुत्पत्तिधर्मिणः ॥ १६३ ॥

जायमानस्य योगः स्यात् स च नालम्बनं विना ।
जनिक्रियासमावेशो विकलाङ्गस्य नेष्यते ॥ १६४ ॥

अथवा चित्तचैत्तानां नैवालम्बनमिष्यते ।
तत्त्वतो जायमानत्वाद् ग्राह्यत्वाद् वापि रूपवत् ॥ १६५ ॥

किं च सालम्बनस्य स्यात् कालभेदात् स चाप्यसन् ।
एवमालम्बनाभावात् किं कस्यालम्बनं भवेत् ॥ १६६ ॥

नाजातस्य निरोधोऽस्ति खपुष्पवदजातितः ।
न निरुद्धे निरोधोऽस्ति निरुद्धत्वाद् यथा मृते ॥ १६७ ॥

नानिरुद्धेऽनिरुद्धत्वाद् वर्तमानप्रदीपवत् ।
निरुध्यमाने नापीष्टः पूर्वोक्तप्रतिषेधतः ॥ १६८ ॥

तुल्यकालस्तथापि स्याद् भिन्नकालोऽपि वा भवेत् ।
युक्तो निरुध्यमानत्वान्नार्हच्चरमचित्तवत् ॥ १६९ ॥

तत्त्वतो जात्यसद्भावाद् भावसत्ता न युज्यते ।
वन्ध्यातनयसत्तावदतो नाधिपतिर्मतः ॥ १७० ॥

कार्येण शून्योऽशून्यो वा प्रत्ययोऽधिपतिर्भवेत् ।
न शून्यस्तेन शून्यत्वाच्छब्दबुद्धेर्यथेक्षणम् ॥ १७१ ॥

संवृत्यापि न चाशून्यः प्रतीतिर्बाधिका यतः ।
कार्ये च न भवेत् कार्यमसत् कार्यं च ते भवेत् ॥ १७२ ॥

कार्यशक्तिर्हि कार्यं चेत् किमन्यत् कारणं ततः ।
आधाराधेयभावो हि तदनन्यस्य नेष्यते ॥ १७३ ॥

कार्यपर्यायमात्रं वा व्योम्नि व्योमस्थितौ यथा ।
यदासौ कारणं किं तद् येनाशून्यं तदिष्यते ॥ १७४ ॥

सतश्च संभवाभावात् कः कस्याधिपतिर्मतः ।
असतः प्रत्ययाभावात् कः कस्याधिपतिर्मतः ॥ १७५ ॥

जाता घटादयो दृष्टा दृष्टे हेतुर्निरर्थकः ।
दृष्टप्रतीतिबाधैवं बाधिका भवतीति चेत् ॥ १७६ ॥

दृष्टं जन्म घटादीनां बालसामान्यया धिया ।
प्रतिषेधस्तथा नायं नातो दोषो यथोदितः ॥ १७७ ॥

न रूपालम्बना बुद्धिः स्वसंवेद्यास्ति तत्त्वतः ।
यतो नो न हि तद्बाधा बाधिका तदजातितः ॥ १७८ ॥

नैव प्रत्यक्षधीर्युक्ता यथार्था परमार्थतः ।
बालबुद्धिविशिष्टत्वादलात इव चक्रधीः ॥ १७९ ॥

नापि तद्गोचरं वस्तु संस्कृतत्वाद् यथात्मधीः ।
अद्रव्यत्वाच्च रूपादेः प्रत्यक्षं नो न बाधकम् ।। १८० ।।

विद्वन्नीतिविचारं च न प्रतीतिः प्रबाधते ।
नाविद्यापटलान्धानां तत्त्वेऽधिक्रियते वचः ।। १८१ ।।

सतोऽपि जन्म नाभीष्टं सतः किं जन्मना भवेत् ।
स्थौल्यं चेन्न च सत्कार्यं स्थौल्यस्यासंभवात् पुरा ।। १८२ ।।

किं च यच्चक्षुषः स्थौल्यं न तत् तत्प्रत्ययैः कृतम् ।
प्रागसत्त्वाद् यथा कुण्डं ज्ञेयत्वाद् वापि भोक्तृवत् ।।१८३ ।।

सामान्येन च संवृत्या भोक्त्राद्यभिमतं हि नः ।
नातो दृष्टान्तदोषोऽपि क्वचिदत्रोपपद्यते ।। १८४ ।।

अभिव्यक्तेरदोषश्चेत् किं केन व्यज्यते यथा ।
यथा घटः प्रदीपेन नाभिव्यक्तिः सतो यतः ।। १८५ ।।

संवृत्यापि प्रदीपेन प्रकाशसहितो घटः ।
क्रियते तन्मतिर्वापि प्रतिपक्षोदयोऽपि वा ।। १८६ ।।

व्यज्यते नानभिव्यक्तमव्यक्तत्वात् खपुष्पवत् ।
स्वनीत्या वा यथा भोक्ता प्रधानं चेति निर्दिशेत् ।। १८७ ।।

न वा सर्वगतो भोक्ता नाहेतुश्चेतनो न च ।
यदि तस्याप्यभिव्यक्तिरव्यक्तत्वं च हीयते ।। १८८ ।।

कार्यं परिणतं यच्च प्रधानं वः प्रसज्यते ।
व्यक्तिप्रधानरूपेण कार्यत्वेऽविकृतिः कथम् ।। १८९ ।।

व्यञ्जका यस्य ये चेष्टा न ते तद्व्यञ्जका मताः ।
कारणत्वादिहेतुभ्यो दध्नस्तन्त्वादयो यथा ।। १९० ।।

तन्त्वादेरपि तच्छक्तेर्दृष्टान्तन्यूनतेति चेत् ।
तन्न तन्त्वादिभावेन न ते तद्व्यञ्जका यतः ।। १९१ ।।

स्वपरस्मान्न जन्मेष्टं न च सदसदात्मनः ।
यतो नोभयवादोऽस्ति युक्तितः प्राक् परीक्षितः ।। १९२ ।।

संवृत्यापि न कार्यस्य प्रत्ययैर्व्यक्तिरिष्यते ।
तद्भेदानुविधायित्वाद् घटस्येव मृदादिभिः ।। १९३ ।।

संवृत्यापि हि नाकस्माज्जातं चक्षुरितीष्यते ।
सामान्येन च तद्योगाद् विशेषेण च कुण्डवत् ।। १९४ ।।

कार्यत्वात् क्रमजन्मत्वाद् विनाशात् परिणामतः ।
हेतुप्रत्ययनैयम्याज्जातितश्चेति लक्षयेत् ।। १९५ ।।

जात्यन्तरनिरुद्धो हि नोत्पन्नः शिवको मतः ।
नाशित्वात् तद्यथा कुण्डं कार्यत्वाद् वेति चेन्मतम् ।।१९६ ।।

न कुण्डं कुण्डरूपेण निरुद्धं जायते यथा ।
तथा चेच्छिवकोऽभीष्ट इष्टमेव प्रसाध्यते ।। १९७ ।।

अथ निरुद्धहेतुत्वं हेतोरेवं विरुद्धता।
संतत्या चेदनष्टस्य स्यादेवं व्यभिचारिता॥ १९८॥

अस्ति गर्भादिबुद्धेः प्रागनन्तरनिरुद्धधीः।
ज्ञेयभेदेन तद्भेदाद् धीत्वाद् वापि तदूर्ध्ववत्॥ १९९॥

चैत्रस्य शब्दबुद्धिर्या रूपबुद्धिश्च जायते।
ज्ञेयभेदात् तयोरैक्यं भिन्नसंतानयोर्यथा॥ २००॥

दृष्टान्तासंभवस्तस्या नैकत्वाज्जायते धियः।
धीत्वान्नापि तदेकत्वं व्यभिचाराद् धियान्यया॥ २०१॥

बालस्य च्युतिचित्तं चेत् साध्यतेऽप्रतिसंधिकम्।
नास्तिकैः च्युतिचित्तत्वादर्हच्चरमचित्तवत्॥ २०२॥

स्यादनैकान्तिको हेतुरतीतच्युतिचेतसा।
जातिस्मरादिसद्भावादुक्तनीत्यापि तच्च सत्॥ २०३॥

च्युतिचित्तं च जनकं भवत्येवान्यचेतसः।
साविद्यत्वादनार्यस्य चित्तं तज्जनकं यथा॥ २०४॥

स्वकर्मजनिता नेष्टाः शरीरेन्द्रियबुद्धयः।
विनाशित्वाद् यथा कुण्डं परलोकोऽस्त्यतो न चेत्॥ २०५॥

तेनैव तस्याकरणात् तदन्येनापि चाकृतेः।
नान्यस्वकर्मजनितो देह इत्यत्र किं हि नः॥ २०६॥

अकर्मजनितत्वे च विद्यते न निदर्शनम् ।
śiṅ la sogs pa dus skye ba /
sems can las kyi dbaṅ gis te // 207 //

sems dmyal gnas daṅ mtho ris na /
mtshon daṅ dpag bsam śiṅ skye bshin //
भूतेभ्यश्च कथं बुद्धिस्तदत्यन्तविलक्षणा ॥ २०८ ॥

अचेतनानां भूतानां चैतन्यं मदशक्तिवत् ।
सूर्यकान्ताग्निवद् वापि जायते जातिमत्त्वतः ॥ २०९ ॥

मदशक्तेरचैतन्याद् दृष्टान्तन्यूनता हि ते ।
अतुल्यजातिहेतुत्वाद्धेतोश्चापि विरुद्धता ॥ २१० ॥

नाध्यात्मिकानि भूतानि बोद्धॄणीति प्रतीयते ।
कठिनादिस्वभावत्वाद् भूतत्वाद् हि तदन्यवत् ॥ २११ ॥

अतो गर्भादिविज्ञानं विज्ञानान्तरपूर्वकम् ।
विद्वद्भिरवबोद्धव्यं ग्राहकत्वात् तदूर्ध्ववत् ॥ २१२ ॥

वत्सः पूर्वकृताभ्यासाज्जातस्याहारमेषते ।
आहारार्थं परिस्पन्दाद् यथा परिणतेन्द्रियः ॥ २१३ ॥

नानैकान्तिकता हेतोरयस्कान्तोपलादिभिः ।
तदाहाराभ्यवहृतेर्दृष्टत्वान्नाप्यसिद्धता ॥ २१४ ॥

कस्यचित् प्रीतिहेतुत्वाल्लोको नेश्वरकर्तृकः ।
विदधानो यथा प्रीतिं नेश ईश्वरकर्तृकः ।। २१५ ।।

अहेतुत्वादजातेर्वा नेशो विश्वस्य कारणम् ।
यथाकाशस्य कुसुमं नेष्टं विश्वस्य कारणम् ।। २१६ ।।

अशेषस्यास्य जगतो नेश्वरः कारणं परम् ।
चित्तवत्त्वाद् यथा गोपो न जगत्कारणं परम् ।। २१७ ।।

सामग्र्या भावनिर्वृत्तेः कश्चिन्नेकोऽस्ति नेश्वरः ।
न चैककर्तृकः कश्चिन्नानैकान्तिकताप्यतः ।। २१८ ।।

सेश्वरं चक्षुरादीष्टं बहुत्वाद् यदि दासवत् ।
अजातैकेश्वरासिद्धेरीशः स्यात् तद्विपर्ययः ।। २१९ ।।

सकर्तृकमथाभीष्टं रचितत्वाद् घटादिवत् ।
अनिर्दिष्टविशेषेण कर्ता चेत् सिद्धसाधनम् ।। २२० ।।

अथ नित्यैकसूक्ष्मादिविशेषेण न तेऽन्वयः ।
अनित्यमूर्तजातत्वदोषापत्तिश्च तस्य वः ।। २२१ ।।

सत्त्वभाजनसंख्यातलोकवैचित्र्यकारणम् ।
कर्मेश्वरश्चेत् संवृत्या सिद्धमेव प्रसाध्यते ।। २२२ ।।

एतेन कालपुरुषप्रधानपरमाणवः ।
कारणं नास्य जगतो विष्णुर्वेति निषेधयेत् ।। २२३ ।।

दृष्टयन्धकारविध्वंसो बुद्धोत्पादो यतस्ततः ।
तद्वदायतनोत्पाद इष्टश्चेदसदुत्तरम् ॥ २२४ ॥

अध्वाभावादनुत्पादे कस्य का दृष्टिरिष्यते ।
तदभूतस्य बोधाय बुद्धोत्पादस्य कर्तृता ॥ २२५ ॥

असुरश्चेत् सुरान्नान्यः कथमेवमशाश्वतम् ।
असुरश्चेत् सुरादन्योऽनुच्छेदो युज्यते कथम् ॥ २२६ ॥

अवाच्यत्वेऽपि घटवत् कथमुच्छेदवर्जनम् ।
सदसत्त्वेऽपि निर्वाणे नेतरस्यास्त्यतिक्रमः ॥ २२७ ॥

यद्युत्पादो निरुद्धस्य कथमेवं न शाश्वतम् ।
अनुत्पादे निरुद्धस्य कथं नोच्छेदवादिता ॥ २२८ ॥

संतानाद्रव्यसत्त्वाच्च कस्मादुच्छेदशाश्वतः ।
तदभावादनुत्पादो युक्तोऽनुच्छेदशाश्वतः ॥ २२९ ॥

अनुत्पादाय दुःखस्य बुद्धानां धर्मदेशना ।
अतस्तत्फलसद्भावादुत्पादोऽभिमतो यदि ॥ २३० ॥

पूर्ववत् तदनुत्पादात् कस्यानुत्पाद इष्यते ।
नानुत्पादः फलं तस्य तत्परिज्ञा तु तत्फलम् ॥ २३१ ॥

तेनैव तस्याकरणात् स्वकृतं तन्न युज्यते ।
अन्येनान्यक्रियायोगान्न चान्यकृतमिष्यते ॥ २३२ ॥

न स्वसंतानजं दुःखमिष्टं सत्त्वाद्यसंभवात् ।
अद्रव्यत्वादभेदाच्च दुःखं तन्नापि संततेः ॥ २३३ ॥

उत्पादिनः प्रसाद्यन्ते संस्काराश्चक्षुरादयः ।
सत्त्वसंज्ञाभिधेयत्वाद् बुद्धवद् यदि तत्त्वतः ॥ २३४ ॥

नोत्पादधर्मो बुद्धो नो नातस्तद्वत् तदुद्भवः ।
आत्मवत् तदसत्त्वाद् वा मायावद् वास्तु संभवः ॥ २३५ ॥

रूपं न बुद्धो बोध्यत्वादुदयाद् वापि लोष्टवत् ।
पराभासात्मभासत्वाद् विज्ञानं नेन्द्रजालवत् ॥ २३६ ॥

न बुद्धो रूपिणः स्कन्धाः स्कन्धसंग्रहतो मताः ।
उदयव्ययधर्मित्वाज्ज्ञेयत्वाद् वापि रूपवत् ॥ २३७ ॥

तन्नाशे नाशदोषाच्च स्कन्धा बुद्धो न युज्यते ।
नान्योऽन्यलक्षणाभावादात्मवत् स कथं च नः ॥ २३८ ॥

अवाच्योऽद्रव्यसन्नेष्टः पूर्ववत् तन्निराकृतेः ।
घटवद् वाप्यवाच्यत्वात् कथं तद्बुद्धता मता ॥ २३९ ॥

न प्रतीत्यसमुत्पाददृष्टेः संबुद्धदर्शनात् ।
इष्ट आयतनोत्पादः पूर्ववत् तन्निराकृतेः ॥ २४० ॥

न सन् नासन् सदसतो न नित्यान्नाप्यहेतुतः ।
नाप्यस्मान्नाप्यनस्माच्च शाश्वतोच्छेदवर्जितः ॥ २४१ ॥

न सन् नासन्न सदसन्नुत्पादोऽतः स कीदृशः ।
दर्शनं दर्शनात् तस्य कथं शास्तुः प्रतीयते ॥ २४२ ॥

स्वभाववादिनां वादः स्वस्मादिष्टविघाटकः ।
मायोत्पादवदुत्पादो यस्य तस्य तु युज्यते ॥ २४३ ॥

उक्तदोषमलापायात् सद्धर्मोल्काप्रकाशनात् ।
क्रियोपकाररूपेण सांवृतं बुद्धदर्शनम् ॥ २४४ ॥

मायोपमस्याभूतत्वात् तत्त्वतस्तन्निदर्शनम् ।
अप्रतर्क्यमविज्ञेयमनिरूप्यानिदर्शनम् ॥ २४५ ॥

निर्निमित्तं निराभासं निर्विकल्पं निरक्षरम् ।
पश्यतो बुद्धिबोद्धव्यं तद्दर्शनमदर्शनात् ॥ २४६ ॥

तदेवं परमार्थेन न स्वतः परतो न च ।
नोभयस्मादकस्माद् वा न सद् वासन्न चान्यथा ॥ २४७ ॥

न केशवेशपुरुषप्रधानाण्वादिकारणात् ।
जायते व्यज्यते वापि भावः कश्चित् कथंचन ॥ २४८ ॥

तत्र स्वभावकारित्वलक्ष्यलक्षणसंश्रयः ।
एकत्वान्यत्वसंक्लेशव्यवधानक्रियाश्रयाः ॥ २४९ ॥

यथाकाशे कशाघातो विचित्रं चित्रकर्म वा ।
बीजानि वा न रोहन्ति तथास्मिन् सर्वकल्पनाः ॥ २५० ॥

तिमिरापगमे यद्वद् विशुद्धामललोचनः ।
नेक्षते केशमशकद्विचन्द्रशिखिचन्द्रकान् ॥ २५१ ॥

क्लेशज्ञेयावृतितमस्तिमिरापगमे तथा ।
न पश्यति बुधः किंचित् सम्यग्ज्ञानामलेक्षणः ॥ २५२ ॥

यथा प्रसुप्तः पुत्रस्त्रीविमानभवनादिकम् ।
पश्येत् सिद्धवशात् तत्र प्रतिबुद्धो न पश्यति ॥ २५३ ॥

संवृत्याधिगतांस्तद्वद् उन्मीलितमतीक्षणः ।
अज्ञाननिद्रोपरमात् प्रतिबुद्धो न पश्यति ॥ २५४ ॥

निशि भूतान्यभूतानि यथा तमसि पश्यति ।
प्रोन्मीलिताक्षोऽभ्युदिते रवावपि न पश्यति ॥ २५५ ॥

न पश्यति तथा विद्वांश्चित्तचैतसगोचरम् ।
सम्यग्ज्ञानरविध्वस्तसमस्ताज्ञानवासनः ॥ २५६ ॥

स्वभावापरिनिष्पत्तेरजातेर्वा स्वभावतः ।
मायेभवन्न भावानामीक्षते सत्स्वभावताम् ॥ २५७ ॥

उत्पत्तिमत्त्वात् संवृत्या हेतुमत्त्वादथापि वा ।
मायेभवन्न भावानामीक्षते सत्स्वभावताम् ॥ २५८ ॥

न सन्ति भावा इति वा यथार्था न मतिर्मता ।
कल्पनाद्वारनिर्वृत्तेः स्थाणोः पुरुषबुद्धिवत् ॥ २५९ ॥

असद्बुद्ध्युपलभ्यो वा भावात्मा वितथो मतः ।
कल्पनाज्ञानगम्यत्वान्मरीच्युदकबुद्धिवत् ॥ २६० ॥

सदसद्बुद्धिबोद्धव्यनिषेधादेवमेव तु ।
जायतेऽजातियोगेन निर्विकल्पा मतिः सताम् ॥ २६१ ॥

शून्यत्वात् सर्वधर्माणां तदशून्यत्वतोऽपि वा ।
न निष्कल्पा मतिर्नेष्टा प्राग्वत् तत्प्रतिषेधतः ॥ २६२ ॥

शून्यतादिस्वभावेन यतः शून्या हि शून्यता ।
न पश्यति ततो विद्वाञ्छून्यतेत्यपि शून्यताम् ॥ २६३ ॥

निराभासोऽपि भावात्मा निष्कल्पमतिगोचरः ।
आलम्ब्यत्वाद् यथार्थो न जलेन्दाविव चन्द्रधीः ॥ २६४ ॥

निर्विकल्पार्थविषया निर्विकल्पापि धीर्मृषा ।
अनात्मादिस्वभावत्वात् तद्यथा सविकल्पधीः ॥ २६५ ॥

ज्ञेयस्य सर्वथासिद्धेर्निर्विकल्पापि यत्र धीः ।
नोत्पद्यते तदतुल्यं तत्त्वं तत्त्वविदो विदुः ॥ २६६ ॥

तद्बोधादुच्यते बुद्धो योऽसावनुदयो धियः ।
अबोधबोधतो मुख्यो विकल्पस्वप्नसंक्षयात् ॥ २६७ ॥

अभिज्ञेयादिनिष्ठातः समताबोधतोऽपि वा ।
निर्माणैर्वापि भव्यानां बुध्यम्बुजविबोधनात् ॥ २६८ ॥

विलक्षणानां धर्माणामनुत्पाद्यानिरुध्य वा।
समत्वेनापि समतां समं वा स्वपरात्मनोः ॥ २६९ ॥

अनालम्ब्यैव संबोधाल्लोकेऽस्मिन् सनरामरे।
उक्तोऽसंबोधसंबोधादेष संबुद्ध इत्यपि ॥ २७० ॥

अप्रक्षेपान्निरुत्क्षेपाद् धर्माणां धर्मता यथा।
तथैव स गतो यस्मात् तस्मात् स च तथागतः ॥ २७१ ॥

गन्तव्यं सर्वथाशेषमन्तपातविवर्ज्यता।
अगत्यापि कायगत्या सुगतः सुगतो यतः ॥ २७२ ॥

सोऽमेयोऽमेयबोध्यत्वादसंख्येयोऽपि वाग्रहात्।
अचिन्त्योऽचित्तगम्यत्वादनिदर्श्योऽनिदर्शनात् ॥ २७३ ॥

अनिरूप्योऽनिरूप्यत्वादिदं तदिति सर्वथा।
निरञ्जनोऽञ्जनाभावाच्छिवश्चोपद्रवात्ययात् ॥ २७४ ॥

सर्वथाप्यविकल्पेन निराभासोऽतदात्मनः।
नित्यत्वान्नित्य इत्युक्तं नित्यं चार्थप्रसाधनात् ॥ २७५ ॥

शान्तः स्वभावशून्यत्वादनिमित्तोऽस्वभावतः।
निमित्तत्वानुपगमादनिमित्ततयाप्ययम् ॥ २७६ ॥

अनिमित्तो निराभासान्निराभासतयापि हि।
आनिमित्तो निराभासो दिदृक्षूणां कृपात्मनाम् ॥ २७७ ॥

अप्रतिष्ठो निरात्मत्वान्निर्विकल्पोऽप्रतिष्ठितेः ।
निष्प्रपञ्चोऽविकल्पत्वान्निरालम्बस्तदग्रहात् ।। २७८ ।।

निरुत्पादं निराकारं निर्विकारं प्रभास्वरम् ।
समासममपर्यन्तं निर्विकल्पमलक्षणम् ।। २७९ ।।

व्योमवद् ये महात्मानमीक्षन्ते तमनीक्षणात् ।
निर्विकल्पनिराभोगविहारामललोचनाः ।। २८० ।।

नमस्कारमनस्कारव्याहारादिनिराकृताः ।
नमस्यन्ति हि ये नाथं नमस्तेभ्योऽपि भावतः ।। २८१ ।।

बुद्धाद्युक्तिसमारोपात् प्रतिपत्त्यनुगुण्यतः ।
सर्वथाप्यविकल्पत्वादवाच्यस्तत्त्वतो मतः ।। २८२ ।।

अत्र वाचो निवर्तन्ते चित्तस्येदमगोचरः ।
निवर्तते च संकल्पो ज्ञानमौनं च जायते ।। २८३ ।।

अनन्तपुण्यराशीणाममेयज्ञेयवेदिनाम् ।
बुद्धानां धर्मकायोऽयं प्रपञ्चोपशमः शिवः ।। २८४ ।।

न मांसचक्षुषा दृश्यो न दृश्यो दिव्यचक्षुषा ।
सविकल्पाविकल्पेन ज्ञानेनाप्येष दुर्दृशः ।। २८५ ।।

पापात्मनामिव स्वर्गः सरणानामिवारणा ।
जात्यन्धानामिवादित्यः तार्किकाणामगोचरः ।। २८६ ।।

न सन्नासन्न सदसन्नान्यस्तेभ्यो न चान्यथा।
नाणीयान् न महान् नैको न दूरे नापि चान्तिके ॥ २८७ ॥

किंचित् कथंचिन्नाप्यस्माज्जायते व्यज्यतेऽपि वा।
नात्रावतिष्ठते कश्चिन्नापि कश्चित् प्रलीयते ॥ २८८ ॥

इदं तत् परमं ब्रह्म ब्रह्माद्यैर्यन्न गृह्यते।
इदं तत् परमं सत्यं सत्यंवादी जगौ मुनिः ॥ २८९ ॥

आर्यावलोकितेशार्यमैत्रेयाद्याश्च सूरयः।
अनुपासनयोगेन मुनयो यद् उपासते ॥ २९० ॥

ततः स्वभावासंभेदात् तेन बोधिततत्त्वतः।
कायस्तथागतस्येष्टो नान्यस्य तदबोधतः ॥ २९१ ॥

एतदभ्यस्यतो ह्यस्यानुपलम्भविहारिणः।
सज्यते मानसं कुत्र द्विष्यते मुह्यतेऽपि वा ॥ २९२ ॥

इष्टानिष्टवियोगादिसंभवोऽस्य कुतो रुजः।
न लिप्यते लोकधर्मैर्वारिणेव सरोरुहम् ॥ २९३ ॥

न निर्गतश्च संसारात् संसाराच्च गतव्यथः।
असंप्राप्तश्च निर्वाणं निर्वाण इव च स्थितः ॥ २९४ ॥

न च क्लेशाग्निसंतापो व्योमवत् क्लेशवानपि।
अचित्तको न चाचित्तः समापत्तिसमाश्रितः ॥ २९५ ॥

स प्रज्ञामेरुशिखरमारूढः करुणावशात् ।
अशोकः शोकसंतप्तं प्रेक्षते दुःखितं जगत् ॥ २९६ ॥

स तदा करुणार्द्रेण लोकमालोक्य चक्षुषा ।
विकल्पशिल्पसंभूतकल्पनाजालसंवृतम् ॥ २९७ ॥

जन्ममृत्युजरारोगशोकशल्यव्रणातुरम् ।
दीनं कृपणमस्वस्थमनाथमपरायणम् ॥ २९८ ॥

महादुःखौघपतितं दुःखोपशमवाञ्छया ।
प्रवृत्तं मूढमनसं दुःखहेतुविवृद्धये ॥ २९९ ॥

शिवे प्रपञ्चोपशमे शरद्गगननिर्मले ।
तत्त्वामृते निरालोकधीप्रचारमलोचनम् ॥ ३०० ॥

पेपीड्यमानः कृपया तद्धिताधानदीक्षितः ।
वज्रशैलमहासारसत्त्वः सत्त्वोत्तमः कृती ॥ ३०१ ॥

दानशीलक्षमावीर्यध्यानप्रज्ञानियोगवान् ।
यथाकालं यथाशक्तिः प्रज्ञास्मृतिपुरःसरः ॥ ३०२ ॥

दानादिशैलप्रभवाः पुण्यामलजलाः शुभाः ।
सर्वसत्त्वहितायैव प्रवर्तयति निम्नगाः ॥ ३०३ ॥

सर्वेभ्यः सर्वदा सर्वबाह्याद्यात्मिकवस्तुना ।
अर्थिभ्यः सर्वदारिद्रयाच्चादुःखानपोहति ॥ ३०४ ॥

अर्थिनां पूरयन्नाशाः प्रतिक्षणमनोरमः ।
सर्वदा चाक्षयफलो धन्यः कल्पद्रुमायते ।। ३०५ ।।

सुगतावेव जन्मास्य परसौख्यहितोदयम् ।
इच्छया वा तदन्यत्र परसौख्यहितोदितेः ।। ३०६ ।।

भक्तशुद्धोपधानान्तपरिवारो गतौ गतौ ।
समुद्रवद् बहुमुखैः पुण्यौघैः परिपूर्यते ।। ३०७ ।।

दक्षाविक्षिप्तचित्तश्च ज्ञेयाधिगमविज्ञया ।
युक्तः सहजया बुद्धया तिष्ठेत् कल्पान् यथेप्सितान् ।।३०८।।

समाध्याप्त्या च धीमत्त्वमसंख्येयाप्रमेयया ।
अनन्तलोकधातूनामलंकारैरलंक्रिया ।। ३०९ ।।

शिल्पकर्माभिसंस्कारकर्मपाकप्रदर्शनम् ।
यथाभीष्टोपपत्तिश्च जगद्धितविधित्सया ।। ३१० ।।

दर्शनं लोकधातूनां पूर्णानां बुद्धविग्रहैः ।
यथेष्टकालसंबोधबुद्धक्षेत्रप्रदर्शनम् ।। ३११ ।।

दर्शनं ज्ञेयतत्त्वस्य सर्वस्य ज्ञानचक्षुषा ।
धर्मव्यवस्थावेदित्वं नामादीनां च लाभिता ।। ३१२ ।।

प्रकम्पनमनन्तानां लोकानामृद्धिजृम्भणात् ।
युगपत् क्रमशो वापि कायज्वलनवर्षणम् ।। ३१३ ।।

सर्वासामप्यनन्तानां स्वाभया स्फुरणं दिशाम् ।
संवेगाय सुरादीनां निरयादिप्रदर्शनम् ॥ ३१४ ॥

अप्रमेयाद्भुताचिन्त्यगुणरत्नोज्ज्वलत्विषाम् ।
दर्शनं लोकबन्धूनां बुद्धानां चैव पर्षदः ॥ ३१५ ॥

सुवर्णमणिवैडूर्यमुक्तावज्रेन्द्रनीलताम् ।
वाञ्छन् महामहीध्राणां करोत्यग्नेश्च शीतताम् ॥ ३१६ ॥

उदारेण शरीरेण वज्रादिष्वप्यसङ्गिना ।
क्षणात् करोति साश्चर्यं सर्वदिक्षु गतागतम् ॥ ३१७ ॥

स्वकाये परमाणौ वा संप्रवेशनदर्शने ।
अनन्तलोकधातूनां सत्त्वपीडां विनापि च ॥ ३१८ ॥

लोकधातूनणोस्तुल्यानणोर्वा तत्प्रमाणताम् ।
संक्षेपप्रथने वाञ्छन् करोत्यूर्ध्वमधोऽपि वा ॥ ३१९ ॥

तत्प्रमाणप्रभावर्णस्वरेर्यपथसंपदा ।
ब्रह्माद्याः पर्षदोऽभ्येति विनेयविनिनीषया ॥ ३२० ॥

आविर्भावतिरोभावावज्ञातस्तत्र केनचित् ।
परव्यभिभवं चैव करोति करुणेरितः ॥ ३२१ ॥

गतिस्थानोक्तिषु वशं जगत् स्थापयतीच्छया ।
प्रतिभानविहीनानां प्रतिभानसुखप्रदः ॥ ३२२ ॥

निरये दुःखतप्तानां शान्तये रश्मिमोक्षणम् ।
करोति स सुरेन्द्रादिसभागागमनानि च ।। ३२३ ।।

यथाविनेयं निर्माणैर्निर्माणैः पूरयन् दिशः ।
करोत्यलौकिकीं प्रीतिं देशनारत्नवृष्टिभिः ।। ३२४ ।।

त्र्यध्वाप्रमाणकायत्वं संबुद्धक्षेत्रसंपदम् ।
अमेयलोकधातूनां संवर्तनविवर्तने ।। ३२५ ।।

स्वकाये सुगतक्षेत्रं तद् वा स्वं कायमात्मनि ।
स्वक्षेत्रे सौगतं कायमिच्छया चाधितिष्ठति ।। ३२६ ।।

रश्मिभ्यो रोमकूपेभ्यस्तुर्येभ्यो वान्तरिक्षतः ।
निर्माणेभ्यश्च निश्चार्य श्रवणोत्सवभूतया ।। ३२७ ।।

व्याप्तापर्यन्तया स्पष्टकलविङ्कमनोज्ञया ।
गम्भीरोदारनादिन्या लोकानापूरयन् गिरा ।। ३२८ ।।

अधिमुक्तीन्द्रियवशात् प्रशमैकरसं शिवम् ।
विनयाय विनेयानां वक्ति धर्ममनेकधा ।। ३२९ ।।

क्लिष्टं सानुशयं शुद्धं सुखदुःखादियोगि च ।
हीनं मध्यं प्रणीतं वा सम्यक्प्रणिहितादि च ।। ३३० ।।

येषां यत्र यथा यावच्चित्तं भवति देहिनाम् ।
तेषां तत्र तथा तावद् बहूनामपि वेत्ति तत् ।। ३३१ ।।

दिव्यनिर्मितसूक्ष्माणि तद्विपर्ययभाञ्जि च।
सर्वत्र सर्वरूपाणि दिव्यचक्षुः स पश्यति ॥ ३३२ ॥

दिव्यार्यघननिर्माणदिव्याञ्छब्दान् समानुषान्।
दूरस्थान् विपरीतांश्च दिव्यश्रोत्रः शृणोत्यसौ ॥ ३३३ ॥

पूर्वे निवासं सर्वत्र सत्त्वानां स्वात्मनोऽपि वा।
स्मरति स्मारयत्यन्यान् नामगोत्रादिभेदतः ॥ ३३४ ॥

नानागतिष्वनिष्टेष्टचित्रकर्मफलस्थितान्।
च्यवमानांश्च्युतान् जातान् वेत्ति सर्वत्र देहिनः ॥ ३३५ ॥

लोकधातुष्वमेयेषु विनेयान् विनयत्ययम्।
तुषितच्युत्यवक्रान्तिसंबोधादिप्रदर्शनैः ॥ ३३६ ॥

आकाङ्क्षमाणोऽपर्यन्तलोकधातुरजःसमान्।
बुद्धक्षेत्रेषु तावत्सु स्वक्षेत्रादचलोऽपि सन् ॥ ३३७ ॥

निर्माय स्वेच्छया कायानेकैकस्मिंश्च तावतः।
पाणीन् मूर्ध्नश्च तज्जिह्वाः प्रत्येकं चापि तावतीः ॥ ३३८ ॥

गन्धपुष्पपुटैश्चित्रैर्जाह्नवीसिकतोपमैः।
मेरुमात्रैः स्फुरद्गन्धस्फीतोत्तमसुगन्धिभिः ॥ ३३९ ॥

संबुद्धेभ्यो विबुद्धेभ्यो जगद्धितविधौ परे।
पूजां विधत्ते भक्त्यार्द्रः स्तुतिभिः स्तौति चासकृत् ॥ ३४० ॥

रत्नच्छत्रवितानाद्यैर्मुक्ताजालपरिष्कृतैः ।
अप्रमाणैः स्फुरद्रत्नकिरणाङ्कुरदन्तुरैः ॥ ३४१ ॥

रम्यहर्म्योज्ज्वलस्तम्भैर्मुक्ताहारविलम्बिभिः ।
विचित्रोदाररत्नौघघटितैश्चित्रकर्मभिः ॥ ३४२ ॥

कूटागारैर्ज्वलद्रत्नप्रभादीपशतोज्ज्वलैः ।
अभ्रंलिहैश्च कुर्वद्भिः स्वप्रभाशवला दिशः ॥ ३४३ ॥

स तेभ्योऽनेकपर्यायां देशनां चासकृत् कृती ।
शृणोति वक्ति चान्येभ्योऽन्यूनाधिकपदाक्षराम् ॥ ३४४ ॥

अमेयकल्पासंख्येयपुण्यज्ञानचयोच्छ्रितः ।
गत्वा पारमितापारमित्येवं पुरुषोत्तमः ॥ ३४५ ॥

भूत्वा संबुद्धसविता भव्यबुद्ध्यम्बुजाकरम् ।
बोधयत्युक्तिकिरणैरमलैर्मलहारिभिः ॥ ३४६ ॥

तुषारहारशीतांशुचन्दनाधिकशीतलैः ।
मनःक्लेशाग्निसंतापं देहिनां हन्ति वाग्जलैः ॥ ३४७ ॥

जन्मावर्ताद् दुःखवीचेर्मृत्युग्राहाद् भवोदधेः ।
तारयत्याशु जनतां यानत्रयमहाप्लवैः ॥ ३४८ ॥

स्वसुभाषितरत्नौघैरत्यन्तं तृड्विघातिभिः ।
निहन्ति गुणदारिद्र्यं जगतोऽनादिकालिकम् ॥ ३४९ ॥

द्रवन्तं भवकान्तारमविद्याधर्मदेशिकम् ।
जनं नयन्ति निर्वाणं प्रज्ञोन्मीलितचक्षुषम् ।। ३५० ।।

संक्लेशाशीविषैर्दष्टं स्वहिताधारमूर्च्छितम् ।
चिकित्सति यथाभूतं ज्ञानविद्यागदैर्जगत् ।। ३५१ ।।

चिरमज्ञानशयितानंनाथान् प्राणिनो भवे ।
प्रबोधयति कारुण्याद् देशनापटहस्वनैः ।। ३५२ ।।

तृष्णानिगडबद्धानां चिरं संसारचारके ।
करोति बन्धनिर्मोक्षं चतुर्मारपराजयात् ।। ३५३ ।।

हुताशवदतृप्तानां विषयैर्दिव्यमानुषैः ।
करोति देहिनां तृप्तिं प्रज्ञामृतरसैः शुभैः ।। ३५४ ।।

दुर्दान्ततीर्थ्यमातङ्गज्ञानमानमदापहम् ।
पर्षत्सु शून्यतासिंहमहानादं नदत्यपि ।। ३५५ ।।

महेन्द्रचापसंकाशव्योमाभापरिवेषिणा ।
देशस्थोत्तप्तसंपूर्णलक्षणव्यञ्जनश्रिया ।। ३५६ ।।

लक्ष्म्यलंकारभूतेन मनोनयनहारिणा ।
रूपेणाप्रतिरूपेण सर्वशोभाभिभाविना ।। ३५७ ।।

सप्रातिहार्यया चैव सषष्ट्याकारया गिरा ।
सुरासुरनरादीनामावर्जयति मानसम् ।। ३५८ ।।

स चिन्तामणिकल्पेन वपुषा वचसापि च ।
विनेयार्थवशाद् दत्ते विश्वेषो विश्वरूपताम् ।। ३५९ ।।

इत्येवमाद्यसंख्येयामेयाद्भुतगुणाकरम् ।
माहात्म्यं लभते विद्वानेतां प्रतिपदं श्रितः ।। ३६० ।।

तत्त्वज्ञानैषणा नाम तृतीयः परिच्छेदः

चतुर्थः परिच्छेदः

श्रावकतत्त्वविनिश्चयावतारः

दुर्विगाहामिमां नीतिं बोद्धुं दुर्बलशक्तयः ।
अस्थानत्राससंरब्धाः प्राहुर्हीनाधिमुक्तयः ॥ १ ॥

निर्विकल्पधियः शास्तुः शरीरं नाश्रयः किल ।
शरीरत्वाच्छरीरं हि यथा गोपस्य नेष्यते ॥ २ ॥

सम्यग्दृष्ट्यादिमार्गेण प्रतीतेन प्रतीयते ।
संबुद्धानां महाबोधिर्बोधित्वाच्छिष्यबोधिवत् ॥ ३ ॥

इन्द्रियातिशयाच्छास्तुः सर्वज्ञज्ञानसंभवः ।
मार्गाभेदे यथाभीष्टाः कस्यचित् प्रतिसंविदः ॥ ४ ॥

एतेनैव च मार्गेण ज्ञेयावरणसंक्षयः ।
चैतसत्वे सति वृतेः क्लेशावृतिवदिष्यते ॥ ५ ॥

महायानेऽप्ययं मार्गः सर्ववित्त्वाप्तये मुनेः ।
यानान्तरत्वात् प्रत्येकबुद्धयाने यथेष्यते ॥ ६ ॥

न बुद्धोक्तिर्महायानं सूत्रान्तादावसंग्रहात् ।
मार्गान्तरोपदेशाद् वा यथा वेदान्तदर्शनम् ।। ७ ।।

फलहेत्वपवादाद् वा यथा नास्तिकदर्शनम् ।
अष्टादशनिकायान्तर्भावाभावान्न निश्चितम् ।। ८ ।।

रूपाद्यालम्बना बुद्धिः स्वसंवेद्यापि विद्यते ।
यतः प्रत्यक्षबाधापि जायतेऽजातिवादिनः ।। ९ ।।

तत्त्वतो हि न भावानां जन्मेत्येवं विशेषणात् ।
न प्रत्यक्षप्रतीतिभ्यां बाधा संभवतीति चेत् ।। १० ।।

अगम्या परमार्थेन गम्यास्त्रीत्वाद् यथेतरा ।
इत्येवमपि वक्तुः स्यान्निर्दोषं दोषवद् वचः ।। ११ ।।

सत्यदृष्टिर्न चेत् तत्त्वं तत्त्वाभावः प्रसज्यते ।
योनाकदेवदेश्यं वा तत्त्वं तच्च न हीष्यते ।। १२ ।।

बाह्यायतनसद्भावस्तन्निर्भासोदयाद् धियः ।
प्रतीयते प्रतीतं वश्चित्तास्तित्वं यथाप्रियम् ।। १३ ।।

अथ चेतोऽस्तिता नेष्टा चित्तमात्रं न वो जगत् ।
जगत्पक्षीक्रियायां च हेतूदाहरणे न वः ।। १४ ।।

तत्र प्रागुक्तनीत्या तु स्वनीतिविपदं परः ।
यदमृष्यन्नुपादिक्षत् तन्न युक्तमितीष्यते ।। १५ ।।

निर्विकल्पा मतिः शास्तुर्नैरात्म्यालम्बना मता ।
यथा पुद्गलनैरात्म्यविषया बुद्धिरित्यतः ।। १६ ।।

साधनं बाध्यते तस्य विरुद्धाव्यभिचारिणा ।
प्रायोगिकादिबुद्धीनामुत्पादो यन्निषिध्यते ।। १७ ।।

ज्ञेयस्य सर्वथासिद्धेर्यस्तत्रानुदयो धियः ।
सोऽयं बोध्योऽभिसंबोधौ ज्ञेयतत्त्वाविपर्ययात् ।। १८ ।।

सा स्वभावविकल्पादिरहिताभिमता मतिः ।
तदाश्रयनिषेधश्चेत् साध्यमेव प्रसाध्यते ।। १९ ।।

कल्पनां च समारोप्य तच्छान्तत्वादिदेशना ।
सम्यग्दृष्ट्यादिमार्गं च भवत्यभ्यसतो यदा ।। २० ।।

अदर्शनमसंकल्पो वागव्याकृतिरक्रिया ।
अनाजीवोऽसमारम्भोऽसंप्रमोषोऽस्थितिस्तथा ।। २१ ।।

तदानेनैव मार्गेण बुद्धबोधिर्मता हि नः ।
सिद्धसाधनदोषोऽतो भावना वा परीक्ष्यताम् ।। २२ ।।

यदागमेनाविधुरमनुमानानुसारिणाम् ।
तत् तत्त्वं भावना चास्य तथैवाभिमता सताम् ।। २३ ।।

स बुद्धो येन तद् बुद्धमन्यथा मातृमोदकम् ।
न बुद्धोक्तिर्महायानमित्यत्राप्येष निर्णयः ।। २४ ।।

बुद्धबोध्याप्तये चायं नालं मार्गः पुरोदितः।
दुःखाद्याकारतो बोधात् प्रत्येकजिनमार्गवत् ॥ २५ ॥

अनुमानेन बाधैवं परपक्षस्य जायते।
दृष्टान्तासंभवो वापि तद्वद्वृत्तेर्निराकृतिः ॥ २६ ॥

नानुत्पादक्षयज्ञाने यथार्थे परमार्थतः।
भ्रान्तिवत् सविकल्पत्वात् तद्बोधः कस्य तत्त्वतः ॥ २७ ॥

हेतुर्यानान्तरत्वाख्य एतेनैव गतोत्तरः।
कथं चावृतिसद्भावादर्हन्नर्हति निर्वृतिम् ॥ २८ ॥

क्लिष्टाविद्याप्रहाणाच्चेत् तन्मुक्तिर्बुद्धवन्मता।
तदसत् तदसद्भावान्मुख्यनिर्माणबुद्धयोः ॥ २९ ॥

न तत्त्वतो महायाने मार्गः संबुद्धबोधये।
सविकल्पनिमित्तत्वात् साक्षाल्लौकिकमार्गवत् ॥ ३० ॥

अथ स्याद् यद्यभूतोऽयं मार्गः क्लेशक्षयोऽप्यसन्।
अभूतत्वाद् यथा स्थाणौ नरज्ञानान्न तत्क्षयः ॥ ३१ ॥

रज्ज्वां सर्प इति भ्रान्तेर्यथा त्रस्तस्य कस्यचित्।
लताकुलरज्जुज्ञानं प्रतिपक्षोऽपि जायते ॥ ३२ ॥

हेतुः सव्यभिचारोऽतो वादत्यागश्च वादिनः।
संक्लेशप्रतिपक्षत्वमेतेन विहितोत्तरम् ॥ ३३ ॥

महायानं च नो बौद्धं नैरात्म्यादिप्रकाशनात् ।
रत्नत्रितयमाहात्म्यप्रथनाच्छिष्ययानवत् ।। ३४ ।।

प्रतितर्केण बाधातो हेतोश्च स्यादसिद्धता ।
महायानोक्तसत्यादिसंग्रहाद् विनयादिषु ।। ३५ ।।

सर्वज्ञताप्तये मार्गः सम्यग्दृष्टिपुरःसरः ।
यस्मादुक्तो महायाने तस्माद्धेतोरसिद्धता ।। ३६ ।।

दुःखोत्पत्तिनिरोधोक्तेर्नाजातं दुःखमिष्यते ।
जातं दुःखस्वभावेन शून्यं तत् किं न गृह्यते ।। ३७ ।।

संस्कृतत्वाद् यथा माया स्कन्धा वानास्रवा यथा ।
दुःखसत्यमतिः किं ते सम्यग्दर्शमतिर्मता ।। ३८ ।।

दुःखा च वेदना दुःखं जात्यादेर्दुःखता कथम् ।
विनाशस्तस्य दुःखं च दुःखत्वं हेतुमार्गयोः ।। ३९ ।।

हेतुत्वतश्चेत् स्याद् दुःखं दुःखं समुदयो भवेत् ।
भाक्तत्वाच्चापि दुःखस्य तज्ज्ञानं दुःखधीः कथम् ।। ४० ।।

न दुःखविषयं ज्ञानं तत्त्वतः सत्यमिष्यते ।
दुःखतस्तत्परिज्ञानाद् यथा वेधादिदुःखधीः ।। ४१ ।।

हेतुर्न दुःखहेतुत्वाद् युक्तः समुदयात्मकः ।
यथा खड्गाभिघातादि चैत्तत्वाद् वापि मार्गवत् ।। ४२ ।।

न दुःखहेतुविषया दुःखाद्याकारबोधतः ।
मतिस्तथ्या मता यद्वत् तदन्या दुःखहेतुधीः ॥ ४३ ॥

अजाते न निरोधोऽस्ति प्रागुक्तप्रतिषेधतः ।
जातेर्निषेधान्नाजातेः खपुष्पस्येव युज्यते ॥ ४४ ॥

निरुद्धश्च निरोधः स्यात् सोऽजातो जन्मना यदा ।
नेष्यते किं तदा विद्वान् त्वमन्यं सत्यतो वद ॥ ४५ ॥

नैवाजातनिरोधोऽपि निरोधः परमार्थतः ।
अनुत्पन्ननिरोधत्वादप्रसंख्यानिरोधवत् ॥ ४६ ॥

निरोधासंभवादेव किं मार्गो मार्गते तव ।
अजातश्च कथं मार्गस्तस्य किं प्रापयिष्यति ॥ ४७ ॥

नापवर्गाप्तये मार्गः संस्कृतत्वात् तदन्यवत् ।
निरोधालम्बनत्वाद् वा यथेतरनिरोधधीः ॥ ४८ ॥

सामान्यालम्बनत्वाद् वा संस्कृतत्वादथापि वा ।
दुःखादिदर्शनं मिथ्या मिथ्याज्ञानवदिष्यताम् ॥ ४९ ॥

एतेन सम्यक्संकल्पव्यायामादिमृषात्वतः ।
मार्गसत्यं न सत्यं ते युज्यते परमार्थतः ॥ ५० ॥

भावनातस्तथायुक्ता युक्ता दुःखाद्यदर्शनात् ।
दृश्यस्यादृश्यरूपेण सर्वदा हि तथास्थितेः ॥ ५१ ॥

अथापि द्रुग्धबुद्धेः स्यात् कस्यचिन्ननु बालवत् ।
न सत्यादर्शनादिष्टो मोक्षोऽपि भवतामिति ॥ ५२ ॥

दुःखतद्दुःख्यनुत्पादे कस्य को मोक्षमिच्छति ।
मुक्तिर्मायाकृतत्वात् सा भ्रान्त्यावेधान्निगद्यते ॥ ५३ ॥

सर्वथादर्शनान्मुक्तिर्दुःखादीनां यतो मता ।
दृष्टान्तासंभवस्तस्मात् तथा हेतोरसिद्धता ॥ ५४ ॥

अयमेव यतो मार्गः सम्यग्दृष्टिपुरःसरः ।
महायानेऽपि निर्दिष्टस्तस्माद्धेतोरसिद्धता ॥ ५५ ॥

वेदान्ते च हि यत् सूक्तं तत् सर्वं बुद्धभाषितम् ॥
दृष्टान्तन्यूनता तस्मात् सन्दिग्धं वा परीक्ष्यताम् ॥ ५६ ॥

सदसत्कल्पनापोढप्रज्ञाचारविहारिणाम् ।
दृष्टिः कस्य कुतश्चेष्टा फलहेत्वपवादिका ॥ ५७ ॥

हेतोः फलेन संबन्धो यथा लोके प्रतीयते ।
तथा निषिध्यते नासावतो हेतोरसिद्धता ॥ ५८ ॥

सांवृतं बालधीग्राह्यं वस्तु प्रत्यक्षगोचरम् ।
प्राग्वदत्र समाधानात् तद्बाधापि न बाधिका ॥ ५९ ॥

विद्वन्नीतिविचारे हि न प्रतीतिः प्रबाधते ।
यथा निरात्मका धर्माः क्षणिकाश्चेति जल्पतः ॥ ६० ॥

न रूपतत्त्वं बालानां विषयत्वमुपार्च्छति।
अध्यात्मविद्यासंस्कारात् तद्यथात्मादिशून्यता ॥ ६१ ॥

न रूपतत्त्वे बालानां धीर्युक्ता पारमार्थिकी।
अविद्यापटलान्धत्वाद् यथा निर्वाणगोचरा ॥ ६२ ॥

तत्त्वतो हि न भावानां जन्मेत्येवं विशेषणात्।
न प्रत्यक्षप्रतीतिभ्यां बाधा कुत्रापि बाधिका ॥ ६३ ॥

शान्तेष्वाकाशकल्पेषु धर्मेषु परमार्थतः।
स्त्रीत्वाद्यसिद्धेर्दृष्टान्ते बाधा कस्य कुतो मता ॥ ६४ ॥

गम्या तद्गमनं गन्ता यथैतद् विद्यते त्रयम्।
अगम्यागमनं साध्यं तथा चेद् दोषदित्सया ॥ ६५ ॥

सत्यं प्रतीतिबाधैवमसिद्धं तु विशेषणम्।
नातोऽस्मद्विधिबाधार्थं समर्थं प्रतिरूपकम् ॥ ६६ ॥

निष्प्रपञ्चं स्वसंवेद्यं विकल्पमलवर्जितम्।
नानात्वैकत्वरहितं शान्तं तत्त्वं विधुर्बुधाः ॥ ६७ ॥

योनाकदेवदेश्यत्वं नातस्तत्त्वस्य युज्यते।
ब्रह्मादिदेवप्रभवं देवमाहुर्यतश्च ते ॥ ६८ ॥

रूपाद्यायतनास्तित्वं बुद्धिविषय इष्यते।
सामान्येन तदस्तित्वं साध्यं तदिष्टमेव नः ॥ ६९ ॥

भौतिकादिस्वभावा हि रूपाद्यायतनास्तिता ।
साध्यते चेन्न दृष्टान्तः प्रतितर्कश्च बाधकः ॥ ७० ॥

रूपाद्यायतनं नेष्टं भूतभौतिकलक्षणम् ।
स्वात्मनिर्भासधीजन्मकारणत्वाद् यथा मनः ॥ ७१ ॥

चित्तचैत्तस्वभावं हि प्रसिद्धं चैत्तचेतसाम् ।
हेतूदाहरणे नातो नष्टः पक्षोऽपि योगिनाम् ॥ ७२ ॥

विज्ञप्तिमात्रमित्यत्र बाह्यार्थस्य निराक्रिया ।
वाक्यार्थ इति तत्त्यागात् पक्षहानिः कुतः सती ॥ ७३ ॥

वागनिर्वचनतः कश्चित् क्रियते न प्रशान्तधीः ।
विद्वांसस्तत्र भोत्स्यन्ते वचसः सारफल्गुताम् ॥ ७४ ॥

श्रावकतत्त्वविनिश्चयावतारो नाम चतुर्थः परिच्छेदः

पञ्चमः परिच्छेदः

योगाचारतत्त्वविनिश्चयावतारः

अन्ये प्रचक्षते धीराः स्वनीतावभिमानिनः।
तत्त्वामृतावतारो हि योगाचारैः सुदेशितः॥ १॥

द्वयाभावस्य सद्भावादभावाद् वा द्वयस्य च।
सदादिबुद्धिविषयः परमार्थो मतः किल॥ २॥

अभावभावो नैरात्म्यं तथता च तथास्थितिः।
निर्विकल्पमतिग्राह्यं तस्यैवाधिगमः पुनः॥ ३॥

उपलब्धिं समाश्रित्य नोपलब्धिः प्रजायते।
नोपलब्धिं समाश्रित्य नोपलब्धिः प्रजायते॥ ४॥

कल्पितानुपलब्धेश्च परतन्त्रस्य चाग्रहात्।
स्वभावं परिनिष्पन्नमीक्षन्ते तत्त्वदर्शिनः॥ ५॥

प्रज्ञप्तेः सनिमित्तत्वादन्यथा द्वयनाशतः।
संक्लेशस्योपलब्धेश्च परतन्त्रास्तिता मता॥ ६॥

प्रज्ञापारमितानीतिरियं सर्वज्ञताप्तये।
न तूत्पादनिरोधादिप्रतिषेधपरायणा ॥ ७ ॥

अत्रोच्यते प्रमाणं नः सर्वं ताथागतं वचः।
आप्तोपदेशप्रामाण्याद् भद्रो हि प्रतिपद्यते ॥ ८ ॥

नागमान्तरसंदिग्धविपर्यस्तमतिः परः।
तस्मात् तत्प्रतिपत्त्यर्थं तन्मृग्यो युक्तिमन्नयः ॥ ९ ॥

द्वयाभावस्य भावो हि विरोधित्वान्न युज्यते।
खपुष्पाभावसत्ता वा न वा तद्भावकल्पना ॥ १० ॥

तत्त्वतः कल्पिताभावात् तदभेदो मतो यदि।
लक्ष्यलक्षव्यवस्थायां तत्तुल्यत्वादनुत्तरम् ॥ ११ ॥

स्वरूपात्यागिता यास्य सा चेत् तद्भाव इष्यते।
तच्च भावोऽत एवासौ स्वरूपं न जहाति चेत् ॥ १२ ॥

अभावालम्बनं ज्ञानमेवं स्यात् तत्त्वदर्शिनाम्।
न चासौ धर्मनैरात्म्यमसद्बुद्धेर्निमित्ततः ॥ १३ ॥

अभावालम्बना बुद्धिरविकल्पा यदीष्यते।
नन्वेवमविकल्पापि रूपबुद्धिः सती भवेत् ॥ १४ ॥

ग्राह्याभासतया चैषा यदि भूता न रूपधीः।
हेतुः स्याद् व्यभिचार्यैवं प्रतिज्ञा चावहीयते ॥ १५ ॥

सविकल्पा च बोधिः स्याच्छास्तुः सालम्बनापि वा।
निर्विकल्पापि धीर्न स्यात् स्वभावालम्बिका सती ॥ १६ ॥

चित्तमात्रोपलम्भेन रूपाद्यग्रहणं न च।
अभ्युपेतप्रतीतिभ्यां प्रतिज्ञा बाध्यते यतः ॥ १७ ॥

नापि रूपादिविज्ञानं विनार्थेनेति युज्यते।
तथाभासोदयाद् यद्वत् स्वप्ने रूपादिबुद्धयः ॥ १८ ॥

यस्मात् स्वप्नादिविज्ञानं धर्मालम्बनमिष्यते।
दृष्टान्तन्यूनता ह्येवं वस्तुनोऽप्यपवादिता ॥ १९ ॥

विषयाभासता चेत् स्याच्चित्तस्यालम्बनं मता।
विषयाभासतां प्रोज्झ्य चित्तात्मान्योऽस्ति कीदृशः ॥ २० ॥

नेष्टा स्फटिकवत् तस्य द्व्याभातान्यनिभोदयात्।
उपादानात् तत्र जातो यतो न स्फटिकक्षणः ॥ २१ ॥

तदपायेऽन्यथोत्पत्तेर्भ्रान्तता तन्मतेर्मता।
शक्त्यभेदान्न द्व्याभता विषयाभावतात्मवत् ॥ २२ ॥

स्वपराभासता नेष्टा चेतसः प्रतिबिम्बवत्।
सहकारानुकारित्वात् तस्माद् द्व्याभासतासती ॥ २३ ॥

प्रमाणफलताभावादिष्टा द्व्याभासतेति चेत्।
अन्यथापि हि तत्सिद्धेस्तत्क्लृप्तिरपि नेष्यते ॥ २४ ॥

बिभ्रता जायमानेन ज्ञानेन विषयाभताम् ।
प्रमीयते प्रमेयं यत् प्रमाणं तेन तन्मतम् ॥ २५ ॥

तन्निर्वृत्तौ च दृष्टत्वात् तन्निर्वृत्तिः फलं मतम् ।
अनिर्देश्यस्वरूपस्य तथैवाधिगमो यतः ॥ २६ ॥

चित्तस्वभावो बाह्योऽर्थो यदि साध्यो विवक्षितः ।
विज्ञानविषयत्वेन तद्यथा समनन्तरः ॥ २७ ॥

प्रत्येकं चैतसैर्हेतोः स्यादेवं व्यभिचारिता ।
सूत्रेषु चित्तमात्रोक्तिः कर्तृभोक्तृनिषेधतः ॥ २८ ॥

विकल्पितार्थशून्यं च विज्ञानं यदि साध्यते ।
अकल्पितार्थसद्भावान्न स्यादर्थनिराक्रिया ॥ २९ ॥

स्वप्नबुद्धिस्वभावेनाकल्पिताभावसंशयः ।
न निरालम्बनापीष्टा दृष्टान्तस्याप्रसिद्धितः ॥ ३० ॥

अथ स्याद् विषयो ह्येकः समूहो वा भवेद् धियः ।
युक्त्या परीक्ष्यमाणस्तु स द्विधापि न युज्यते ॥ ३१ ॥

तत्रानुरूपमेकं तु रूपबुद्धेर्न गोचरः ।
अतदाभतया यद्वदक्षरूपं न गोचरः ॥ ३२ ॥

अनेकमपि चित्तस्य नैव तद्गोचरं मतम् ।
रूपं हि परमाणूनामद्रव्यत्वाद् द्विचन्द्रवत् ॥ ३३ ॥

तत्रासंचितरूपस्य चित्तगोचरता यदि ।
प्रसाध्यते परेणापि सिद्धिरेव प्रसाध्यते ।। ३४ ।।

अथ संचितरूपस्य हेतोरेवमसिद्धता ।
रूपान्तरैरुपकृतैस्तन्निर्भासोदयाद् धियः ।। ३५ ।।

तस्यालम्बनता चेष्टा तदाभमतिहेतुतः ।
रागवद् बाध्यते तस्मात् प्रतिज्ञा तेऽनुमानतः ।। ३६ ।।

यद्यनालम्बना साध्या स्वबीजादुदयाद् धियः ।
मनोधीवदकल्पत्वात् स्यात् ते सालम्बना ननु ।। ३७ ।।

अनालम्बानुमानाद् वा न धीत्वादिनिराक्रिया ।
समूहस्याप्रतिज्ञानात् तन्निषेधो न बाधकः ।। ३८ ।।

असत्यपि च बाह्येऽर्थे द्वयमन्योन्यहेतुकम् ।
शक्तिर्विषयरूपं च तन्निवृत्तिः कुतो मता ।। ३९ ।।

आर्यत्वादविकल्पत्वादहेया निर्विकल्पधीः ।
तदुत्पादात् कुतो मोक्षस्तद्बीजानुपघाततः ।। ४० ।।

द्वयप्रवृत्तौ संज्ञाया विश्वाभासं प्रजायते ।
विश्वं तदाभता यास्य तदुत्पादः स्वबीजतः ।। ४१ ।।

लयः शक्त्यर्पणात् तस्य स्वात्मन्येवान्यतोऽपि वा ।
ननु विज्ञानपर्यायादात्मैवायं निरूपितः ।। ४२ ।।

द्वैतं मायोपमं मत्वा क्षुण्णं चाशान्त्यनात्म तद् ।
अद्वैतं चाक्षयं भूतममृतं परमं पदम् ।। ४३ ।।

सामान्याभावतस्तत्र कल्पनाविनिवृत्तितः ।
निर्विकल्पधियालम्ब्य मुक्त्यभेदोऽपि विद्यते ।। ४४ ।।

चित्तमात्रप्रसिद्ध्यर्थं न चित्ताद् व्यतिरेकिणः ।
चैत्ता वाभ्युपगन्तव्या न वा विज्ञप्तिमात्रता ।। ४५ ।।

वेदनादिसमूहे वा चित्तप्रज्ञप्तिरिष्यताम् ।
तथा पराणुवादः स्यात् स्वनीतित्यागितापि च ।। ४६ ।।

संक्लेशव्यवदानाच्चेद् द्रव्यसच्चित्तमिष्यते ।
वेदनादितथोत्पादात् तत्प्रसिद्धे न बाधकम् ।। ४७ ।।

यथा पर्णादिसंतानः शालूकबहुशक्तितः ।
तथाद्रव्यसतश्चित्ताच्चित्राः संततिवृत्तयः ।। ४८ ।।

प्रतिपक्षादनुत्पत्तिरुत्पत्तिः कारणे सति ।
अद्रव्यत्वान्न चात्रेष्टा चित्रोत्पादादिकल्पना ।। ४९ ।।

न तदालम्ब्य निर्मोक्षो नापि नोपरतिर्धियः ।
संवृत्या तत्त्वतो वापि नात्मवित्तुल्यतास्त्यतः ।। ५० ।।

स्वभावतोऽप्यजातत्वादद्रव्यत्वाद् विनाशतः ।
रूपादिशून्यं मायावदित्यभ्यासादसङ्गिता ।। ५१ ।।

सद्भावेऽपि च रूपादेर्यथाभूतावबोधतः ।
व्यावर्तते ह्यसद्ग्राहस्तदभावे न किं तदा ॥ ५२ ॥

नैव द्रव्यविकल्पश्च चित्तचैतसगोचरः ।
प्रतिषिद्धेऽपि रूपादौ न प्रवर्तितुमर्हति ॥ ५३ ॥

तन्निरासाय चेदिष्टो विध्यन्तरपरिग्रहः ।
प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम् ॥ ५४ ॥

नेष्टो भुजगवच्चासन् संकल्पः कल्पितत्वतः ।
रज्ज्वात्मना ह्यनेकान्तात् प्रतीतिरपि बाधिका ॥ ५५ ॥

तदंशदृष्टेर्न भ्रान्तिरनेकांशा हि सा यतः ।
सर्वथार्थनिषेधात् ते स्याच्च वस्त्वपवादिता ॥ ५६ ॥

तदसत्त्वेऽपि संक्लेशो न नाम्नोऽर्थप्रवृत्तितः ।
अभिलापापरोक्षाणां तिरश्चां क्लेशदर्शनात् ॥ ५७ ॥

रूपाभिलापसापेक्षरूपधीजन्मतो न च ।
रूपं रूपस्वभावेन शून्यं कल्पयितुं क्षमम् ॥ ५८ ॥

अरूपात्मव्यवच्छिन्नवस्त्वाभमतिगोचरः ।
रूपस्यात्मा तदस्तित्वाद्युक्ता रूपशून्यता ॥ ५९ ॥

सामान्यमभिलाप्यं हि सामान्यं न च किंचन ।
नाभिलाप्यात्मशून्यत्वमेवमप्युपपद्यते ॥ ६० ॥

वाच्यं सामान्यवद्वस्तु तदाभमतिहेतुतः ।
तस्य तेनात्मना सत्त्वान्न युक्तानभिलाप्यता ॥ ६१ ॥

विजातीयेन शून्यत्वं तुल्यधीवृत्तिहेतुतः ।
सामान्यात् तुल्यजातीये सामान्यमिति निश्चितम् ॥ ६२ ॥

नाश्रयस्याग्रहे ग्राह्यं संख्यावत् तद्ग्रहे ग्रहात् ।
तद्वत् कल्प्यमतो वस्तु वाच्यं नेष्टं पृथग् भवेत् ॥ ६३ ॥

अभेदसत्त्वाद्व्याभ्यामेकतोऽनेकवृत्त्यपि ।
तद्विनाशेऽविनाशाच्च नान्यस्मिन् तन्मतिर्न च ॥ ६४ ॥

अनीलानुत्पलाभिन्नरूपेणाव्यवधानतः ।
सामानाधिकरण्यं हि द्वयोरेकार्थवृत्तितः ॥ ६५ ॥

नान्यापोहोऽन्यसामान्यमन्यधर्माद् विशेषवत् ।
नाभावस्याविशेषत्वाद् धीभेदः कम्बलादिषु ॥ ६६ ॥

वस्त्वग्रहे ग्रहाच्चास्य नेष्टा कल्प्यत्ववाच्यते ।
तद्द्वारेणान्यवाच्यत्वे तद्वाच्यत्वादि हीयते ॥ ६७ ॥

तदन्यभिन्नरूपस्य वस्तुनोऽनभिलाप्यता ।
न युक्तैव मनोयुक्ता योगाचारनयादिति ॥ ६८ ॥

अभिलापात्मशून्यत्वाद् भावानां निःस्वभावता ।
तेनैव चाप्यनुत्पादादनुत्पन्नानिरुद्धता ॥ ६९ ॥

यतोऽभिलापवद् वस्तु न तथा कथ्यते यथा।
अवस्तुकत्वं धर्माणामित्यादि बहु चोदितम्॥ ७० ॥

परतन्त्रास्तितोक्तौ च संवृत्या सिद्धसाधनम्।
तत्त्वतश्चेन्न दृष्टान्तो हेतोश्चापि विरुद्धता॥ ७१ ॥

उत्पत्तिनिःस्वभावत्वं सद्भूताजातितो यदि।
नानुत्पादनिरोधादिप्रतिषेधसमर्थनम्॥ ७२ ॥

प्रत्ययैर्जायते यो हि तमजातं जगौ मुनिः।
स्वभावतस्तदुत्पादनिषेधात् परमार्थतः॥ ७३ ॥

अभूतत्वाच्च धर्माणां तत्स्वसामान्यगोचरः।
संवृत्या न विरुध्यन्ते चित्रधीशब्दवृत्तयः॥ ७४ ॥

येन येन हि नाम्ना वै यो यो धर्मोऽभिलप्यते।
न स संविद्यते तत्र धर्माणां सा च धर्मता॥ ७५ ॥

अथ प्रत्ययसंभूतस्वभावे नेष्टसाधनम्।
उत्पत्तिः पारतन्त्र्याच्चेन्मायावन्नन्वभूतता॥ ७६ ॥

परतन्त्राग्रहश्चापि स्वभावाजातितो मतः।
जातस्य परमार्थेन मिथ्याख्यानं न युज्यते॥ ७७ ॥

यथा ख्यान्ति तथा सन्ति तदाभासात्मना यतः।
यथा ख्यान्ति तथा सत्त्वाद् धर्मा मायोपमाः कथम्॥ ७८ ॥

सद्भूतेनात्मनाजातेरनुत्पन्नानिरुद्धता।
अवस्तुत्वास्वभावत्वे तथाप्यद्रव्यसत्त्वतः॥ ७९ ॥

विज्ञप्तिमात्रतुल्यत्वात् प्रज्ञप्तेर्नास्ति दुष्टता।
हेयप्रहात्र्यसद्भावात् कस्येष्टं निर्विदादि सत्॥ ८० ॥

विकल्पोपरमान्मुक्तिरद्रव्यत्वेऽपि सा यतः।
द्रव्यसत्त्वेऽप्यजातत्वान्नातोऽन्या कल्पनेष्यते॥ ८१ ॥

प्रज्ञप्तेरप्यसद्भावो वस्त्वभावे भवेत् सति।
तद्दृष्टिर्नास्तिकोऽकथ्यः स ह्यसंवास्य एव च॥ ८२ ॥

स्वयमापायिकत्वेऽसौ परेषां च विपादकः।
इति द्वेषामिषोद्गारोऽभिमानाजीर्णसूचकः॥ ८३ ॥

असद्भूतस्वभावत्वाद् बालसंमोहहेतुतः।
अभूत्वाभवनाद् वापि धर्मा मायोपमा मताः॥ ८४ ॥

नाकाशसमता युक्ता निर्विकल्पस्य वस्तुनः।
नानासंज्ञाविकल्पानामवकाशप्रभावनात्॥ ८५ ॥

जाते नानभिलप्यत्वं प्रतिक्षेपात् पुरोदितात्।
सत्यप्यनभिलापित्वे संवृतौ तत्त्वविभ्रमः॥ ८६ ॥

तत्त्वेऽन्यतत्त्वसद्भावाद् यदीष्टं तत्त्वदर्शनम्।
घटेऽपि द्विघटाभावात् किं नेष्टं तत्त्वदर्शनम्॥ ८७ ॥

न नीतिच्छिद्रगुप्त्यर्थं तत्संक्लेशविशुद्धिते ।
स्यातां ते कनकादीनां प्रत्ययानुविधानतः ॥ ८८ ॥

यथाक्षशुद्ध्यशुद्धिभ्यां ख्याति खं समलामलम् ।
विशुद्धं च सदाकाशं धर्माणां धर्मता तथा ॥ ८९ ॥

तत्क्लिष्टत्वादिधीभ्रान्तिः कर्तृधर्मो न कर्मणः ।
न तदालम्बना शुद्धिस्तत्त्वं नालम्ब्यमिष्यते ॥ ९० ॥

द्रव्यसत्त्वे च तत्त्वस्य पूर्ववद् दोषसंप्लवः ।
लोकोत्तराविकल्पा च तद्बुद्धिर्न मता व्ययात् ॥ ९१ ॥

तावत् सतिमिरा बुद्धिर्यावज्ज्ञेयानुकारिणी ।
यावदुत्पद्यते ज्ञानं तावज्ज्ञेयानुकारिता ॥ ९२ ॥

स्वात्मनीवासिधारायाः ज्ञानावृत्तेरसंभवात् ।
स्वसंवृत्तिनिषेधाच्च न स्यात् सर्वज्ञता सकृत् ॥ ९३ ॥

प्राग्वज्जातिप्रतिक्षेपादजाताद्रव्यसत्त्वतः ।
निर्विकल्पार्यधीग्राह्योऽनभिलप्यश्च सर्वथा ॥ ९४ ॥

भावाभावस्य भावोऽपि स्वभावः पारमार्थिकः ।
समारोपापवादान्तमुक्तिस्ते विद्यते कथम् ॥ ९५ ॥

न भावस्तत्त्वतोऽजातेर्नाभावस्तदभावतः ।
भावाभावद्वयापेतमिष्टं तत्त्वमतोऽद्वयम् ॥ ९६ ॥

निरालम्बो न शास्ता स्यात् तथतालम्बनत्वतः ।
न चापि समता बोधिस्तत्त्वस्वाभासभेदतः ॥ ९७ ॥

तथतालम्बना या धीः कुतोऽनाहितशक्तिका ।
खपुष्पाभा न धीर्युक्ता यथानाहितशक्तिता ॥ ९८ ॥

नैकत्वान्यत्वमुक्तं वस्तत्त्वं स्वनयगुप्तितः ।
अद्रव्यानुपलभ्यत्वाद् युक्तं नस्तद् यथोदितम् ॥ ९९ ॥

अजातेर्निर्विशेषत्वात् खतुल्यं चाप्यलिप्यतः ।
अत्यन्तानभिलाप्यं च सर्वथाप्यग्रहाद् धिया ॥ १०० ॥

विगतोत्पादतिमिरा मतिर्लोकोत्तरा मता ।
लोकादुत्तारणार्थेन लोकातिक्रमतोऽपि वा ॥ १०१ ॥

निर्विकल्पा निरालम्बा निर्निमित्ता च सा तया ।
अबोधसमताबोधात् स्वान्यधर्मतया सकृत् ॥ १०२ ॥

अनुत्पादो हि धर्माणां धर्मनैरात्म्यमुच्यते ।
न कल्पनाकलङ्काङ्कसंभवस्तत्र पूर्ववत् ॥ १०३ ॥

तत्त्वस्यातर्कगम्यत्वात् तद्बोधो नानुमानतः ।
नातस्तर्केण धर्माणां गम्यते धर्मतेति चेत् ॥ १०४ ॥

इहानुमानान्निर्दोषादागमानुविधायिनः ।
कल्पिताशेषविविधविकल्पौघनिराकृतेः ॥ १०५ ॥

सकलज्ञेययाथात्म्यमाकाशसमचेतसः ।
ज्ञानेन निर्विकल्पेन बुद्धाः पश्यन्त्यदर्शनात् ॥ १०६ ॥

अतोऽनुमानविषयं न तत्त्वं प्रतिपद्यते ।
तत्त्वज्ञानविपक्षो यस्तस्य तेन निराक्रिया ॥ १०७ ॥

आगमान्तरभेदेन भेदायातासु बुद्धिषु ।
अभेदेऽप्यागमस्यान्यः कः परीक्षाक्षमो विधिः ॥ १०८ ॥

प्रतिज्ञामात्रका नेष्टा प्रतिपक्षनिराक्रिया ।
अनिषिद्धे विपक्षे च निर्विकल्पा मतिः कुतः ॥ १०९ ॥

सत्यद्वयमतश्चोक्तं मुनिना तत्त्वदर्शिना ।
व्यवहारं समाश्रित्य तत्त्वार्थाधिगमो यतः ॥ ११० ॥

सालम्बनत्वाद् वितथा तथतालम्बनादपि ।
स्वप्नादिधीवत् तद्ग्राह्यं नातस्तत्त्वं च युज्यते ॥ १११ ॥

अग्राह्योऽनभिलाप्यश्च धीप्रचारविवर्जितः ।
धर्म उक्तो मुनीन्द्रेण स चैवं सति बाध्यते ॥ ११२ ॥

अतो युक्तागमोपेतं तत्त्वं यत् प्रागुदाहृतम् ।
परीक्ष्यमाणं युक्त्यैवं तदेवाव्याहतं स्थितम् ॥ ११३ ॥

kha cig phuṅ po'i ljon śiṅ chags /
kha cig rnam śes rgya la thogs //

yaṅ dag mtha' yi gyaṅ sar yaṅ /
ma lhuṅ rgyal ba'i thugs sras rol // 114 //

योगाचारतत्त्वविनिश्चयो नाम पञ्चमः परिच्छेदः

षष्ठः परिच्छेदः

सांख्यतत्त्वावतारः

अचेतना हि प्रकृतिस्त्रिगुणा प्रसवात्मिका।
विपरीतः पुमानस्मादित्यभ्यासवतः सदा॥ १॥

तद्भूतसत्त्वे मनसि बुद्धिवृत्त्यनुकारिणः।
प्रतिबिम्बोदयात् पुंसः परिणामादथापि वा॥ २॥

अन्योऽहमन्या प्रकृतिरित्येवं तत्त्वदर्शनात्।
निवृत्तकार्यकरणो मुक्त इत्युच्यते पुमान्॥ ३॥

नाहं ममेति संबुद्धेः कृतार्था चेत्यनुग्रहात्।
मुच्यते प्रकृतिर्वेति तत्त्वं सांख्याः प्रचक्षते॥ ४॥

तत्र प्रधानपुरुषौ यथायुक्तौ तथोदितौ।
मीमांस्ये ते पुनश्चापि नात्मा चैतन्यमिष्यते॥ ५॥

ज्ञेयावबोधश्चैतन्यं ज्ञेयाभावे न चास्तिता।
कश्चेदानीं भवेदात्मा चेतनो वाप्यचेतनः॥ ६॥

नादग्धं दहति युक्त्या दाह्याभावात् स पूर्ववत् ।
नातो दहनदृष्टान्ताच्चेतनात्मा प्रसिध्यति ।। ७ ।।

बोध्याकारं दधानो हि बुद्धिबोध इतीष्यते ।
द्रव्याश्रयत्वाद् भावस्य स चायं पुरुषाश्रयः ।। ८ ।।

पुरुषेऽविकृतौ स्वार्थे स चायं विधुरो विधिः ।
बोधादन्यन्न चैतन्यं किं तदन्यत् प्रकल्प्यते ।। ९ ।।

चैतन्यं न मतिर्युक्ता हेतुमत्त्वाद् यथा घटः ।
अतो न बुद्धिश्चैतन्यमित्येवं चेन्मतिर्भवेत् ।। १० ।।

चैतन्यादन्यता बुद्धेः साध्या चेन्न निदर्शनम् ।
बुद्धौ हि तदभावश्चेदभ्युपेतेन बाध्यसे ।। ११ ।।

अजातस्य च चैतन्यमजातत्वान्न युक्तिमत् ।
अस्ति चेदसतस्तस्माद् बुद्धिरेव हि तन्मतम् ।। १२ ।।

बुद्धिवृत्त्यविशिष्टाभिज्ञबुद्धिर्यत इष्यते ।
भेदे सत्यविशेषः स्यात् स च नास्तीति सोऽप्यसन् ।। १३ ।।

अथ स्यादात्मधीर्यापि यथार्थासौ क्वचिन्मता ।
क्वचित् तद्विपरीतत्वात् स्थाणौ स्थाणुमतिर्यथा ।। १४ ।।

यत्र क्वचिद् यथार्था चेत् संवृत्या सिद्धसाधनम् ।
यथार्था चित्तविषया यस्मान्नात्मेति नो मता ।। १५ ।।

अथ सर्वगतत्वादिलक्षणे धीयथार्थता।
न तत्त्वतो न संवृत्या किंचिदस्ति निदर्शनम्॥ १६॥

नाचेतनायाश्चैतन्यं विकृतिश्चेतनस्य वा।
तत्त्वज्ञानोदयः कस्य यस्य मुक्तिर्भविष्यति॥ १७॥

चैतन्यानुग्रहेऽप्यस्या नाहमित्यादिनिश्चयः।
अचैतन्याद्युक्तः स्यात् किं पुनस्तदसंभवे॥ १८॥

निवृत्तिर्नापि युक्तास्या बहुसाधारणत्वतः।
यथा मृतैकजारायाः तथा दास्या इतीष्यते॥ १९॥

कथमात्मान्तरैः पुंसो देशभेदादनावृतेः।
उद्भूतसत्त्वे मनसि तत्त्वदृग्नियमो मतः॥ २०॥

शब्दादिप्रतिपत्तौ च धर्माधर्मादयस्तथा।
तुल्यपर्यनुयोगत्वाददृष्टो नियमोऽप्यसन्॥ २१॥

अचेतनो न वा हेतुर्नैव सर्वगतः पुमान्।
परिणामाद् यथा दध्नः पुंसः परिणतिर्यदि॥ २२॥

प्रतिबिम्बस्य हेतुत्वाच्चितेरविकृतेरपि।
यथोक्तदोषसंसर्गो जायते मुखबिम्बवत्॥ २३॥

अकल्पकत्वात् पुंसश्च नान्योऽहमिति युज्यते।
उपचाराददोषश्चेन्मुक्तिः स्यादौपचारिकी॥ २४॥

अस्ति प्रधानं भेदानामन्वयात् परिणामतः ।
कार्यकारणभावाच्च शक्तितो वैश्वरूप्यतः ॥ २५ ॥

यद् यथोक्तं तथोक्तं तत् कर्पराणां कलादिवत् ।
तथा च भेदास्तद्वत्तस्तस्माद् भेदाः सकारणाः ॥ २६ ॥

भेदानां चेत् सहेतुत्वं साध्यते सिद्धसाधनम् ।
समन्वयस्य चासिद्धेर्हेतोश्च स्यादसिद्धता ॥ २७ ॥

सामान्यपूर्वकत्वं चेदिष्टं सामान्यवत्त्वतः ।
सामान्यतो विशेषाद् वा प्राग्वन्न वा निदर्शनम् ॥ २८ ॥

न सुखादिस्वभावत्वं वेदनास्कन्धवन्मतम् ।
स्कन्धत्वात् सुखदुःखाद्यैः प्रत्येकं व्यभिचारतः ॥ २९ ॥

मोहस्य वा वेदनत्वाद् दृष्टान्तन्यूनता भवेत् ।
हेतुमत्त्वाच्च तत्सिद्धेर्नेष्टा दुःखसुखादिवत् ॥ ३० ॥

व्यभिचारस्यापहतेरेवमप्यकृतात्मता ।
अन्वयाद्यनुमानाच्च प्रतिज्ञादोषबाधनात् ॥ ३१ ॥

अजातानन्तवत्त्वादितद्विशेषनिराकृतेः ।
प्राधानिकगुणैश्चेष्टा हेतवो व्यभिचारिणः ॥ ३२ ॥

एककारणपूर्वत्वे स्याच्च तेषां विरुद्धता ।
तथा विभक्तहेतुत्वे विद्यते न निदर्शम् ॥ ३३ ॥

चन्दनं शकलोत्पत्तौ न ध्वस्तमिति गम्यते।
बलरूपप्रमाणादिप्रत्यासत्तेस्तदात्मवत्॥ ३४॥

अतो विभक्तहेतुत्वे दृष्टान्तासिद्धता न चेत्।
शक्त्यात्मना तदस्तित्वे पूर्ववन्न निदर्शनम्॥ ३५॥

व्यक्तात्मना तदस्तित्वे कृतान्तत्यागिता भवेत्।
कार्यकारणयोरैक्यं साधनेऽप्युक्तनीतिवत्॥ ३६॥

एकजातिनयैकत्वसाधने सिद्धसाधनम्।
तदन्यार्थविकल्पे च पूर्ववद् दोषसंप्लवः॥ ३७॥

एतेन पूर्वबुद्धीनां निषिद्धाप्यनुमानता।
सर्वदा सुखदुःखाद्यैर्हेतवो व्यभिचारिणः॥ ३८॥

यतस्तत्त्वे नानन्यत्वं ....न चोक्तवत्।
कालभेदादनन्यत्वे रूढ्यागमविरोधिता॥ ३९॥

न चन्दनतिरोभावेऽभावश्चेत् स प्रसाध्यते।
सेष्टकालेन चाप्युक्तेर्वर्तमानक्षणो यथा॥ ४०॥

नन्वेवमपि नोत्साहं स्वनीतिच्छिद्रगुप्तये।
नोक्तदोषोऽनुबध्नाति घट उत्कचमुक्तिवत्॥ ४१।

ताद्रूप्यादिति हेत्वर्थविकल्पे व्यभिचारिता।
अभेदरूपतायां च स्याद् वा हेतोरसिद्धता॥ ४२॥

सभोक्तृत्वं च श्रोत्रादेरचैतन्याद् यदीष्यते ।
अनिर्दिष्टविशेषाणां भक्षश्चेत् सिद्धसाधनम् ।। ४३ ।।

अथोदासीननित्यादिविशेषानुनयः कुतः ।
भोक्तृत्वं न निरीहत्वाच्चैतन्ये सत्यपीष्यते ।। ४४ ।।

निष्क्रियत्वं तु भावानां प्रमेयत्वात् प्रमीयते ।
यद् यथोक्तं तथा तच्च प्रतीतं सुखमोहवत् ।। ४५ ।।

दुःखमप्यवसेतव्यं निष्क्रियं हेतुमत्त्वतः ।
अचेतनत्वाद् वाच्यत्वान्मेयत्वाद् वापि मोहवत् ।। ४६ ।।

हेतुत्वमन्वयादीनां भेदत्वे सति वाञ्छतः ।
प्राधानिकगुणैस्तेषां सत्यं न व्यभिचारिता ।। ४७ ।।

सिद्धं कारणकार्यादि हेतुमत्त्वानुमानतः ।
सविशेषणहेतूनां स्यादेवं ते विरुद्धता ।। ४८ ।।

[49-64 only in Tib.]

सांख्यतत्त्वावतारो नाम षष्ठः परिच्छेदः

सप्तमः परिच्छेदः

वैशेषिकतत्त्वावतारः

काणादैरिष्यते मुक्तौ न पृथिव्यादितत्त्वधीः ।
अगृहीतविशेषत्वाद् यथा जीवादितत्त्वधीः ॥ २७ ॥

न वैशेषिकतत्त्वेऽपि कुदृक्तिमिरकारिणी ।
इति युक्तिवियुक्तत्वात् प्रीतिराधीयते धियः ॥ २८ ॥

[1-26 not in the MS.]

वैशेषिकतत्त्वावतारो नाम सप्तमः परिच्छेदः

अष्टमः परिच्छेदः

वेदान्ततत्त्वविनिश्चयावतारः

वेदान्तवादिनः प्राहुरात्मविद् दुर्लभो बहिः।
कुत आत्मद्विषां मोक्षः शून्यसस्कारवादिनाम् ॥ १ ॥

तमःपरस्तात् पुरुषं महान्तं सूर्यवर्चसम्।
मृत्युमत्येति मतिमान् मत्वात्मानं महेश्वरम् ॥ २ ॥

रुक्मवर्णं यदा पश्यः पश्येत् कर्तारमीश्वरम्।
विहाय पापं पुण्यं च परं साम्यं तदाप्नुयात् ॥ ३ ॥

भूतं भवद् भविष्यच्च सर्वं पुरुष इष्यते।
सोऽन्तर्बहिश्च दूरे च सोऽन्तिके स च कर्मकृत् ॥ ४ ॥

विश्वे भावास्ततो जाता ऊर्णनाभादिवांशवः।
तस्मिन् प्रलीना विद्वांसो नाप्नुवन्ति पुनर्भवम् ॥ ५ ॥

अमृतत्वं न मर्त्यस्य वह्नेः शैत्यमिवेष्यते।
तस्मादमृततायुक्ताप्रबोधात् पुरुषेऽमृते ॥ ६ ॥

यतः परं परं नास्ति यतो ज्यायान्न विद्यते ।
अणीयान् वापि तेनेदं विश्वमेकेन संततम् ।। ७ ।।

de ni phra daṅ rags daṅ ldan /
yaṅ ldan gtso bo dbaṅ sgyur ba //
rab phye 'dod pa'i mthar thug gaṅ /
rnal 'byor ji ltar 'dod par 'gro // 8 //

तस्मिन् सर्वाणि भूतानि भवन्त्यात्मैव पश्यतः ।
बालपण्डितचण्डालविप्रादीनां च तुल्यता ।। ९ ।।

घटोत्पत्तौ विनाशे वा नाकाशस्य तदात्मता ।
तदात्मतात्मनोऽपीष्टा न देहाद्युदयव्यये ।। १० ।।

घटाकाशवदेकस्य नानात्वं चेदभेदतः ।
घटभेदेन चैकत्वं साम्यं सर्वस्य यन्मतम् ।। ११ ।।

यथा घटादिभेदेऽपि मृद्भेदो नास्ति कश्चन ।
de bshin lus ni tha dad kyaṅ /
bdag la tha dad 'ga' yaṅ med // 12 //

घटाकाशे यथैकस्मिन् रजोधूमादिभिर्वृते ।
तद्वत्ता न हि सर्वेषां सुखादेर्न तदात्मनः ।। १३ ।।

अप्रबोधादनात्मज्ञः स्वप्ने मोहाभिमानवत् ।
चिनोति कर्म भुङ्क्ते च तत्फलं यच्छुभाशुभम् ।। १४ ।।

देहसंस्थोऽप्यसङ्गत्वाद् भुञ्जानो नोपलिप्यते ।
राजवत् कामचारी च पापेनानपराध्यसौ ॥ १५ ॥

एकं सर्वगतं नित्यं परं ब्रह्माच्युतं पदम् ।
योगी युञ्जन् यदा वेत्ति न तदैति पुनर्भवम् ॥ १६ ॥

नित्यं तदविकल्पं च यत्र वाचामगोचरः ।
गिरस्तत्र प्रयुज्यन्ते भेदापहृतबुद्धिभिः ॥ १७ ॥

अत्रापीदं परीक्षन्ते पक्षपातानपेक्षिणः ।
पक्षरागावृतमतिः सत्यं यथापि नेक्षते ॥ १८ ॥

निषिद्धमात्मनोऽस्तित्वं जगत्कारणता तथा ।
अतस्तद्दर्शनान्मुक्तिरभूतैव प्रकल्पिता ॥ १९ ॥

सत्कायदृष्टिः सहजा पशूनामप्यशान्तये ।
सर्वसंक्लेशमूलत्वात् सैव त्वया विवर्धिता ॥ २० ॥

सत्कायदृष्ट्याविष्टानां ममाहंकारकारिणाम् ।
यतो भावितः संसारो मुक्तिरप्युदिता ततः ॥ २१ ॥

तद्दृष्टौ चेद् भवेच्छान्तिर्मदादिव मदात्यये ।
अजीर्णात् संनिपन्नस्य भोजनात् स्वस्थता भवेत् ॥ २२ ॥

rig byed smra bas bdag de ni /
rnam pa gñis su 'dod byed de //

lus shes bya ba bciṅs bdag daṅ /
mchog na gnas pa grol pa'i bdag // 23 //

न परेष्टात्मविषया यथार्थात्मेति धीर्यथा।
आत्मन्येवं परामर्शाद् देहादावात्मधीर्यथा ॥ २४ ॥

परिकल्पितसत्त्वोऽपि किमात्मा कुरुते तव।
रूपशब्दादिविषयां बुद्धिं चेत् तन्न युज्यते ॥ २५ ॥

धियो रूपादिविषया जायन्ते नात्मकर्तृकाः।
प्रत्ययायत्तजन्मत्वात् सूर्यकान्तादिवानलः ॥ २६ ॥

ध्वनिर्वर्णात्मको यश्च सोऽपीष्टो नात्मकर्तृकः।
श्रावणत्वाद् ध्वनित्वाद् वा तद्यथा प्रतिशब्दकः ॥ २७ ॥

एतेन शेषाः प्रत्युक्ता गमनागमनादिकाः।
हस्तपादादिविस्पन्दलक्षणा देहजाः क्रियाः ॥ २८ ॥

व्यवच्छेदेन संज्ञाया संज्ञानं स्मरणं स्मृतेः।
प्रज्ञानं च प्रकारेण प्रज्ञातो वेदनं विदः ॥ २९ ॥

न चान्यदात्मनः कार्यं स्वभावो नावधार्यते।
खपुष्पवदतस्तस्य न सत्ताप्यवधार्यते ॥ ३० ॥

ज्ञानादेः करणोक्तेश्चेत् करणत्वं प्रसाध्यते।
तदन्यकर्तृकत्वं वा दातृवत् तन्न युक्तिमत् ॥ ३१ ॥

कर्तरि प्रत्ययोत्पत्तेर्नैषां करणता यतः ।
अतोऽसिद्धार्थता हेतोरनेकान्तिकतापि वा ।। ३२ ।।

ज्ञानादीनां हि कर्तृत्वं कर्तृशब्दाभिधानतः ।
देवदत्तश्छिनत्तीति यथा दृष्टात्र कर्तृता ।। ३३ ।।

निरीह एव संस्कारराशौ स्यात् कर्तृवाच्यता ।
करणत्वाद् यथा दीपे दीपो द्योतयतीति ते ।। ३४ ।।

न मुख्यस्तत्त्वतः कर्ता नैको हि घटकृद् यतः ।
नौपचारिककर्तृत्वं दीपादेरिष्यते ततः ।। ३५ ।।

चित्तं रागादिवशगं सक्तं रूपादिगोचरे ।
प्रतिबद्धं च निर्मोक्षे बद्धं संसारचारके ।। ३६ ।।

पाण्यादिसमुदायोऽयं सचित्तः सत्त्वसंज्ञकः ।
त्यागादिचेतनोत्पत्तेर्दातेत्यादि निगद्यते ।। ३७ ।।

विद्योत्पत्तावविद्यादिसंयोजननिवृत्तितः ।
रागादिबन्धनान्मुक्तो मुक्त इत्यभिधीयते ।। ३८ ।।

आत्मनि व्योमकल्पे तु सर्वमेतत् सुदुर्वचः ।
खपुष्पमस्तु वात्मा ते यद्यात्मातीव वल्लभः ।। ३९ ।।

स्वभावतो हि यद्यात्मा ज्ञानभाव इतीष्यते ।
न तर्ह्यस्यैकता युक्ता करणादिव्यपेक्षणात् ।। ४० ।।

सति वात्मादिके ज्ञेये ज्ञानं तन्न निवर्तते ।
कृतार्थस्यापि दीपस्य दृष्टं जन्म स्वकारणात् ॥ ४१ ॥

सतो ज्ञानोदयो यावत् तावद् बीजं प्रचीयते ।
आरावप्रभवो यावत् तावत् प्रतिरवो यथा ॥ ४२ ॥

संसारश्च कथं ज्ञस्य ज्ञानं च करणं विना ।
सर्वदा च विशिष्टत्वाद् बन्धमोक्षौ कुतः कथम् ॥ ४३ ॥

न दुःखेनापि निर्मोक्षो मोक्षेऽप्येकात्मवादिनः ।
आत्मनस्तदनन्यत्वाद् यथोष्णेन विभावसोः ॥ ४४ ॥

लीनानुत्पन्नबुद्धिश्च कथं ज्ञः करणं विना ।
यथा हि पूर्णकश्छेत्ता न युक्तः परशुं विना ॥ ४५ ॥

अग्निना दहतीत्युक्ते दहत्यग्निर्न राधकः ।
तद्वद् वेत्ति धियेत्युक्ते ज्ञानं वेत्ति न वः पुमान् ॥ ४६ ॥

कुलालवन्न तत्सिद्धिस्तत्स्वभावो यतो न सः ।
नेष्टा दहनवत् सिद्धिर्दाह्याभावेऽग्न्यसंभवात् ॥ ४७ ॥

न चाज्ञो ज्ञः कथं कर्ता भोक्ता च स भवेत् तव ।
व्योमकल्पोऽविकल्पश्च किं कल्प्यः केवलागमात् ॥ ४८ ॥

न चाज्ञाज्ञः स्वभावो वा निःस्वभावो भवेदसौ ।
निःस्वभावश्च नात्मा स्याद् वन्ध्यातनयवत् स च ॥ ४९ ॥

यत्पीडानुग्रहे यस्य तद्दुःखानुग्रहोद्भवः ।
न तस्यात्मा ह्यसौ युक्तो यथा खं देवशर्मणः ॥ ५० ॥

ध्यानज्ञानादि चेदिष्टं मुक्तयेऽर्थान्तरात्मनः ।
अनात्मार्थः प्रयत्नः स्यान्मर्त्यः स्यान्नामृतः कथम् ॥ ५१ ॥

अन्तरात्मात्मनोऽन्यश्चेत् .... ।
.... प्रतिज्ञा ते च हीयते ॥ ५२ ॥

नान्तरात्मात्मनोऽन्यश्चेत् प्रतिज्ञा ते च हीयते ।
.... ॥ ५३ ॥

यदि सूक्ष्मो महान् नायं महांश्चेन्नास्य सूक्ष्मता ।
न चैको रूपिधर्मश्च कथमात्मन्यरूपिणि ॥ ५४ ॥

न युक्ता हस्तिदृष्टान्तादेकस्यानेकरूपता ।
करः करी यतो नेष्टः करादीनां न चैकता ॥ ५५ ॥

सूर्यादिवर्णो यद्यात्मा स्यादवर्णः कथं च सः ।
नेष्टा पलाशदृष्टान्तादात्मनोऽनेकरूपता ॥ ५६ ॥

यतः पलाशो नैकोऽस्ति सर्वदा विकृतात्मकः ।
मूलादयो यतो नैके प्रत्ययैश्चापि भेदिनः ॥ ५७ ॥

ज्यायस्ता च परत्वं च तदन्यापेक्षमिष्यते ।
संभवोऽमुष्य च विधेरेकत्वे कथमिष्यते ॥ ५८ ॥

द्रव्यं यदि भवेदात्मा द्रव्यत्वात् सर्वगो न सः ।
घटवन्नापि नित्यः स्यात् तेन पूर्णं कुतो जगत् ॥ ५९ ॥

द्रव्यस्याधारता युक्ता द्रव्यं चात्मा न युज्यते ।
खपुष्पवदजातत्वान्नाधारत्वं यतस्ततः ॥ ६० ॥

कस्मिन् सर्वाणि भूतानि भवन्त्यात्मैव पश्यतः ।
आत्मतानात्मनो नेष्टा यथाभावस्य भावता ॥ ६१ ॥

न बालाद्यविशेषोऽतो निराधारोऽनिदर्शनः ।
एकत्वे नात्मनो नैकदोषोपप्लवसंभवः ॥ ६२ ॥

मैत्रात्मा चैत्रकरणैश्चैत्रात्मवदपीक्षताम् ।
चैत्रादभिन्नमूर्तित्वाद् देशाभेदादथापि वा ॥ ६३ ॥

सुखदुःखोपभोक्ता च तन्मुक्तौ चापि मुच्यताम् ।
तद्बन्धे चापि बन्धोऽस्य तद्दुःखे वास्तु दुःखितः ॥ ६४ ॥

न घटाकाशदृष्टान्तात् सर्वेषां तदसंभवः ।
आकाशस्य यतोऽसिद्धमेकत्वं भवतापि च ॥ ६५ ॥

मुक्तो द्रव्यस्य यो भावस्तदाकाशं हि सांवृतम् ।
गतिर्गतिमतां तत्र सोऽवकाशोऽवकाशिनाम् ॥ ६६ ॥

नातोऽनावृतिराकाशं नावकाशस्य दातृ च ।
तद्धेतूक्तौ तदस्तित्वे हेतोस्तु स्यादसिद्धता ॥ ६७ ॥

नापि हेत्वनुपादानादाकाशं भाव इष्यते।
वन्ध्यातनयवन्नापि तदेकमत एव हि ।। ६८ ।।

मृदो घटादिरूपाय मृज्जातीयतयैकता।
अन्या चान्या च कुण्डादावतो नैकत्वमात्मनः ।। ६९ ।।

ज्ञत्वे सत्यविपर्यासान्नेष्टा ज्ञस्याभिमानिता।
अज्ञत्वे चाविपर्यासान्नेष्टाज्ञस्याभिमानिता ।। ७० ।।

व्योमवच्चाविकारित्वादसङ्गत्वादथापि वा।
नात्मनः कर्तृता युक्ता युक्ता नापि च भोक्तृता ।। ७१ ।।

कर्ता चेल्लिप्यते नात्मा कर्तुरिष्टं फलं कथम्।
न युक्तो राजदृष्टान्तः पापभाग् नृपतिर्यतः ।। ७२ ।।

न चैकताद्वितीयस्य युक्ता बाह्यानपेक्षणात्।
एकत्वयोगादेकश्चेद् योगस्तस्यैव नेतरः ।। ७३ ।।

अनेकं कल्पयित्वा चेदेकता तदपोहतः।
एकत्वं तत्त्वतो न स्यात् कल्पना सांवृती यतः ।। ७४ ।।

नित्यैकत्वादिरूपेण तत्त्वतश्चेत् स विद्यते।
एकादिशब्दधीवृत्तिरर्थे सति निरत्यया ।। ७५ ।।

एकत्वादिविकल्पाच्च कथमस्याविकल्पता।
विकल्पविषये चार्थे वाचां वृत्तिरवारिता ।। ७६ ।।

धियामविषयो ह्येवं कथं वा गोचरो गिराम् ।
अवाच्यो निर्विकल्पोऽपि वितथः पूर्वनीतिवत् ।। ७७ ।।

बुद्ध्या चेद् दर्शनान्मुक्तिस्तद्भेदात् कथमेकता ।
नानात्वधीवत् सा च स्याद् वितथा पूर्ववद् ग्रहात् ।। ७८ ।।

अजातिसमतां याते ज्ञानेऽभेदात् क्व दर्शनम् ।
अदर्शनाद् विमुक्तिः स्यान्मुक्तिर्वा नास्ति कस्यचित् ।। ७९ ।।

बोधे सति तदुत्पादादजातिसमता कुतः ।
सत्यभावादनुत्पादे तद्विकल्पसमोऽपि सः ।। ८० ।।

अजातिर्जातिवद् धर्मस्तदभावे च सा सती ।
नैवात्मसमता तस्य युक्ता नापि न तत्स्थता ।। ८१ ।।

अजस्य को न भेदोऽस्ति मतो येन समर्थनम् ।
न जाताजातयोरिष्टमजत्वं तत्त्वतो यतः ।। ८२ ।।

खपुष्पात् तदभेदश्चेदसत्पक्षपरिग्रहः ।
परिनिष्पत्तिभेदश्चेदद्वैतं न प्रसिध्यति ।। ८३ ।।

नातो भावो न चाभावो न पृथग् नापृथक् पुमान् ।
न नित्यो नाप्यनित्यश्च न बुद्धिध्वनिगोचरः ।। ८४ ।।

ज्ञेयस्य सर्वथासिद्धेर्न्याय्यो बुद्धेरगोचरः ।
धीगोचरनिवृत्तौ च स्याद् गिरामप्यगोचरः ।। ८५ ।।

ताथागतीमवितथां मत्वा नीतिमिमां शुभाम् ।
तस्माज्जातस्पृहैस्तीर्थ्यैः कृतं तत्र ममापि तत् ॥ ८६ ॥

कः श्रद्धास्यति तां तत्र पूर्वापरविरोधिनीम् ।
अत्यन्तातुल्यजातीयं मणिरत्नमिवायसः ॥ ८७ ॥

देशनायास्तु वैचित्र्यादिहैवं स्यादयं नयः ।
आकर्षणार्थमेकेषां शेषग्राहनिवृत्तये ॥ ८८ ॥

अजातता हि भावानां स्वभावोऽकृत्रिमत्वतः ।
अनपायित्वतश्चासावात्मेत्यपि निगद्यते ॥ ८९ ॥

एकोऽसावेकरूपत्वाद् भावभेदेऽप्यभेदतः ।
सर्वगः सर्वधर्मत्वान्नित्यश्चाप्यविनाशतः ॥ ९० ॥

अजातत्वादजातोऽयमत एवाजरामरः ।
अच्युतश्च्युतभावाच्च प्रकर्षत्वात् परं मतम् ॥ ९१ ॥

न रूपशब्दगन्धादिर्न भूम्यग्निजलानिलाः ।
नाकाशशशिसूर्यादिर्न मनोज्ञानलक्षणः ॥ ९२ ॥

सर्वश्चासौ स्वभावत्वान्न सर्वं चाविनाशतः ।
तत्र क्लेशाद्यनुत्पत्तेः शुद्धोऽसौ शान्त एव च ॥ ९३ ॥

स कल्पनासमारोपाद् वाच्योऽवाच्यस्तु तत्त्वतः ।
सर्वथा चाप्यवाच्यत्वादुक्त एष निरञ्जनः ॥ ९४ ॥

ईदृशो यद्यभिप्रेत आत्मा हि भवतामपि।
नामादिबहुसाधर्म्यान्निर्दोषः सोपपत्तिकः ॥ ९५ ॥

नैरात्म्यादेव भीतानां भीत्या तत्रैव च स्थितिः।
आकाशादिव भीतस्य क्व चान्यत्र स्थितिर्भवेत् ॥ ९६ ॥

स्वागतं क्रियतां तृप्तिर्नात्र कश्चिन्निवार्यते।
बुद्धानां लोकबन्धूनां तत्त्वामृतमिदं परम् ॥ ९७ ॥

अपि त्वात्मत्वकर्तृत्वभोक्तृत्वादिर्निरास्पदः।
संत्यज्यतामसद्ग्राहो भूतदृक्प्रतिबन्धकः ॥ ९८ ॥

स्वभावाजातितोऽजातिर्भावानां तत्त्वतो मता।
स्वभावतो ह्यजातत्वादुक्तैषा निःस्वभावता ॥ ९९ ॥

नैःस्वाभाव्यं च नैरात्म्यं न तदात्मा विरोधतः।
अनात्मा चेद् भवेदात्मा गोरभावोऽपि गौर्भवेत् ॥ १०० ॥

युक्तः स्वभावाभावोऽसौ कथं स्यात् कर्तृभोक्तृते।
दृष्टे वन्ध्यासुतस्येव नाकस्मात् कर्तृभोक्तृते ॥ १०१ ॥

इत्थंभूतात् कथं जन्म प्रलयस्तत्र वा कथम्।
न व्योमकुसुमे युक्ता प्रलयोत्पादकल्पना ॥ १०२ ॥

स्वभावाभावविषया यावद् बुद्धिः प्रवर्तते।
धीकल्पनासमारोपास्तावदेकादिका मताः ॥ १०३ ॥

सविकल्पाविकल्पा च यदा बुद्धिर्निवर्तते ।
धियामविषये तस्मिन् प्रपञ्चोपशमः शिवः ॥ १०४ ॥

वेदान्ततत्त्वविनिश्चयावतारो नाम अष्टमः परिच्छेदः

नवमः परिच्छेदः

मीमांसातत्त्वनिर्णयावतारः

एकेऽपवर्गसन्मार्गध्यानज्ञानापवादिनः।
क्रियामात्रेण तत्प्राप्तिं प्रतिपाद्यानपत्रपाः ॥ १ ॥

शास्त्रोक्तव्रीहिपश्वाज्यपत्नीसंबन्धकर्मणः।
नान्यो मार्गोऽपवर्गाय युक्त इत्याहुरागमात् ॥ २ ॥

रागादिदोषदुष्टत्वात् पुरुषस्य वचो मृषा।
वेदोऽपुरुषकर्तृत्वात् प्रमाणमिति गृह्यते ॥ ३ ॥

कर्तुरस्मरणाच्चेष्टो वेदोऽपुरुषकर्तृकः।
संप्रदायानुपच्छेदादागमोऽसौ तदत्यये ॥ ४ ॥

अत्यन्ताक्षपरोक्षे हि प्रतिपत्तिः कथं भवेत्।
अदृष्टलिङ्गसंबन्धे स्वर्गापूर्वादिवस्तुनि ॥ ५ ॥

नित्यः शब्दो ध्वनिव्यङ्ग्यः संबन्धोऽर्थेन नित्यतः।
प्रतिपत्तुर्यतोऽर्थेषु प्रतिपत्तिः प्रजायते ॥ ६ ॥

अद्विप्रवृत्तेरभ्यासात् प्रत्यभिज्ञानतस्तथा ।
शब्दवच्छ्रावणत्वाद्धि नित्यः शब्दोऽवसीयते ।। ७ ।।

अनुमानात् पृथक् चासौ प्रमाणत्वात् तदन्यवत् ।
एकानेकार्थविषयप्रतिपत्तिरथापि वा ।। ८ ।।

अदृष्टलिङ्गसंबन्धपदार्थमतिहेतुतः ।
भिन्नगोचरधीजन्मकारणत्वादथापि वा ।। ९ ।।

अपूर्वोऽपि क्रियाव्यङ्ग्यः क्रिया मोक्षेऽपि साधनम् ।
सोमपानादिका विद्वान् निर्जयेदन्तकं यया ।। १० ।।

देवर्षिजुष्टशिष्टेष्टं पुराणं वर्त्म शोभनम् ।
वेदार्थबाह्यैः स्त्रीशूद्रैर्युक्तं यत् त्यज्यते त्रयी ।। ११ ।।

यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित् ।
चतुष्टयेऽपि धर्मादौ तदेवान्यत्र दृश्यते ।। १२ ।।

दूषयित्वा त्रयीमार्गं हेतुभिर्हेतुवादिनः ।
अनुमानप्रधानत्वात् स्वनयं द्योतयन्ति ये ।। १३ ।।

पादस्पर्शादिवान्धानां विषमे पथि धावताम् ।
अनुमानप्रधानानां पातस्तेषां न दुर्लभः ।। १४ ।।

न चास्ति कश्चित् सर्वज्ञो नेदानीं दृश्यते यतः ।
सर्वज्ञता हि बुद्धस्य कल्पिता लोकपक्तये ।। १५ ।।

अप्रमाणं वचो बौद्धं कृतकत्वात् तदन्यवत् ।
असर्वज्ञश्च संबुद्धः पुरुषत्वात् तदन्यवत् ॥ १६ ॥

अप्रमाणं वचो बौद्धं त्रयीदर्शनदूषणात् ।
यद् यथोक्तं तथोक्तं तद्यथा नग्नाटदर्शनम् ॥ १७ ॥

तदत्रापि परीक्षन्ते यथाभूतगवेषिणः ।
पक्षपातविषं हित्वा शब्दार्थन्यायकोविदाः ॥ १८ ॥

संप्रदायानुपच्छेदादागमस्यागमत्वतः ।
सर्वस्यागमतासिद्धेः किं तत्त्वमिति धार्यताम् ॥ १९ ॥

यत् परीक्षाक्षमं युक्त्या वचनं चेत् तदागमः ।
तदेव तावन्मीमांस्यं पश्चात् तेनोदितं हि यत् ॥ २० ॥

तत्र तत्प्रतिपक्षत्वाज्ज्ञानान्मुक्तिरितीष्यताम् ।
आमयप्रतिपक्षत्वादौषधाद् व्याधिमुक्तिवत् ॥ २१ ॥

क्रियात्वान्न क्रियाभीष्टा कृषिवन्मुक्त्यवाप्तये ।
अधीत्वे सति वाच्यत्वान्मितकालत्वतोऽपि वा ॥ २२ ॥

नृवाक् चेद् दोषदुष्टत्वादप्रमाणमितीष्यते ।
सौवर्णिकादिवाक्येन हेतुः स्याद् व्यभिचारवान् ॥ २३ ॥

प्रामाण्यमथ वेदस्य साध्यतेऽकर्तृकत्वतः ।
असाधारणता हेतोः स्यादसिद्धार्थतापि च ॥ २४ ॥

अनुवादादकर्तृत्वे बौद्धमप्यस्त्यकर्तृकम् ।
पूर्वबौद्धाभिसंबुद्धं यतो बुद्धैरनूद्यते ॥ २५ ॥

कृतकत्वानुमानाच्च पक्षबाधानुमानतः ।
कर्तुरस्मरणासिद्धेर्हेतोश्च स्यादसिद्धता ॥ २६ ॥

समन्त्रस्यैव संभूतो मन्त्रकर्तुः पुरा यदि ।
शास्त्रं वा समभिप्रेतं तत्कर्तृकमकर्तृकम् ॥ २७ ॥

सकर्तृकत्वं शास्त्रस्य किमेवं न प्रतीयते ।
तत्सहोत्पन्नकर्तृत्वाज्जातिस्मरकृतैर्यथा ॥ २८ ॥

प्रतिपत्त्यानुगुण्येन वर्णाम्नायादथापि वा ।
गृह्यते वेदवाक्यानां न किं पुरुषकर्तृता ॥ २९ ॥

इतश्च वेदवाक्यानां मता पुरुषकर्तृता ।
विवक्षितार्थधीजन्मकारणत्वाद् यथेङ्गितम् ॥ ३० ॥

अनुमेयश्च वेदोऽयं असत्पुरुषकर्तृकः ।
भूतहिंसासुरापानक्रियोक्तेर्मगशास्त्रवत् ॥ ३१ ॥

विषोपयुक्तिवद्धिंसा यदि मन्त्रपरिग्रहात् ।
नाभीष्टानिष्टफलदा शास्त्रोक्तेर्वापि दानवत् ॥ ३२ ॥

मन्त्रकर्षणचूर्णाद्यैरागम्यागमनं हि यत् ।
तेनानैकान्तिकः पूर्वो मद्यपानेन चोत्तरः ॥ ३३ ॥

आयुश्छेदप्रयोगत्वादिष्टो मन्त्रपरिग्रहः ।
अनिष्टफलदः कर्तुर्विषशस्त्रप्रयोगवत् ॥ ३४ ॥

स्वशास्त्र एव चेदुक्ते सिद्धः संसारमोचकः ।
सामान्येन च हेतूक्तौ स्यादन्यतरासिद्धता ॥ ३५ ॥

यज्ञे पशूनां हिंसा चेन्नानिष्टफलदायिनी ।
तादर्थ्याद् ब्राह्मणार्था हि यथेष्टा पचनक्रिया ॥ ३६ ॥

भोक्त्रर्थाः पशवोऽभीष्टा भोग्यत्वात् तद् यथाङ्गना ।
तस्माद् यज्ञार्थतासिद्धेः पशूनां हेत्वसिद्धता ॥ ३७ ॥

अन्तर्वेद्यां च हिंसेयं संचिन्त्याभ्रान्तिमारणात् ।
अनिष्टफलदा कर्तुरायत्यां तद् यथेतरा ॥ ३८ ॥

इतश्चानिष्टफलदा हिंसा यज्ञ इतीष्यते ।
संचिन्त्यजीवितोच्छेदि दुःखाधानाद् यथेतरा ॥ ३९ ॥

यादृक् फलमधिष्ठाने दृष्टे हि कुरुते क्रिया ।
कर्तुस्तादृगदृष्टेऽपि हिंसा वा तद् यथेतरा ॥ ४० ॥

व्याख्यातं मद्यपानादि प्रत्याख्यानाद् यथोदितात् ।
मद्यं न मदहेतुत्वात् सेव्यं धुस्तूरकादिवत् ॥ ४१ ॥

न मद्यपानं निर्दोषं यज्ञे मन्त्रपरिग्रहात् ।
मद्यत्वात् तद् यथान्यत्र दृष्टो मन्त्रपरिग्रहात् ॥ ४२ ॥

दृष्टं न लिङ्गमस्तीति यदि स्वर्गाद्यनिश्चयः।
लिङ्गादनुमितत्वाच्च निश्चेतुर्निश्चितेर्न किम्॥ ४३॥

अद्विप्रवृत्तेरित्यत्र दीपेऽप्यद्विप्रवृत्तितः।
व्यभिचारितया हेतोः शब्दनित्यत्वमप्यसत्॥ ४४॥

सत्त्वादनित्यः शब्दोऽयं क्रियावत् किं न गृह्यते।
अथवा देहचेष्टावद्धीहेतुत्वाद् विनाश्ययम्॥ ४५॥

अभ्यासप्रत्यंभिज्ञानहेत्वोरन्वयहीनता।
नाभ्यासप्रत्यभिज्ञानेऽनित्येऽदृष्टे क्वचिद् यथा॥ ४६॥

शब्दत्वनित्यतासिद्धेः शब्दत्वं न निदर्शनम्।
अभिव्यक्तिनिषेधाच्च ध्वनिव्यङ्ग्यो न चाप्ययम्॥ ४७॥

श्रावणो यदि शब्दस्ते ध्वनिव्यङ्ग्यः कथं मतः।
प्रतिपत्तिस्तु संकेतादसौ शब्दः प्रसज्यते॥ ४८॥

संकेतासंभवादादौ प्रतिपत्तिर्न युज्यते।
संसारवदनादित्वात् संकेतस्यानुवादतः॥ ४९॥

अनुमाने प्रमाणत्वं भिन्नं च न तदात्मनः।
अतोऽनैकान्तिको हेतुः प्रमाणत्वादितीरितः॥ ५०॥

भिन्नगोचरतासिद्धेर्हेतोश्च स्यादसिद्धता।
भिन्नगोचरधीजन्मकारणत्वस्य नेतरः॥ ५१॥

अनेकार्थविनाभावादनुमानमपीष्यते ।
नैकार्थप्रतिपद्धेतुरस्माच्छाब्दान्न भिद्यते ॥ ५२ ॥

अदृष्टलिङ्गसंबन्धे परार्थादनुमानतः ।
प्रतिपत्तिर्यतो बोध्ये तस्मादर्थान्तरं न सः ॥ ५३ ॥

नानुमानात् पृथक्छाब्दः परोक्षमतिहेतुतः ।
संबन्धस्मृत्यपेक्षत्वादनुमानं यथा स्वतः ॥ ५४ ॥

नापूर्वोऽपि क्रियाव्यङ्ग्यः शब्दव्यक्तिनिषेधवत् ।
घटवद् वाप्यभिव्यक्तेरपूर्वोऽनित्य इष्यताम् ॥ ५५ ॥

अनित्यं सोमपानादिक्रियाफलमितीष्यते ।
क्रियाफलत्वात् तन्नेष्टा कामनैमित्तिकं फलम् ॥ ५६ ॥

न मोक्षप्रापिका युक्ता सोमपानादिकी क्रिया ।
क्रियात्वात् तद्यथा नेष्टा कामनैमित्तिकी क्रिया ॥ ५७ ॥

न जयत्यन्तकं तस्मादेनं पन्थानमाश्रितः ।
परप्रणेयैर्जुष्टोऽयं विचाराक्षमबुद्धिभिः ॥ ५८ ॥

त्रयीमार्गप्रणेतॄणां ब्रह्मकेशवशूलिनाम् ।
दृष्ट्वा क्लेशात्मिकां चर्यां युक्तं यत् त्यज्यते त्रयी ॥ ५९ ॥

ज्ञानेन ज्ञानिनः पापं दहत्यग्निरिवेन्धनम् ।
अतस्तेजोविशेषाच्च न तेषां प्रत्यपायिता ॥ ६० ॥

यत् क्लेशदहनायालं तज्ज्ञानं ज्ञानिनो विदुः।
नातः प्रकुरुते पापं ज्ञानी तद्धेत्वसंभवात्॥ ६१॥

सिद्धियोगो न लिप्येत कर्मणा पातकेन वा।
इति ब्रुवाणैः सन्मार्गान्निष्टैरन्येऽपि नाशिताः॥ ६२॥

तत्त्वार्थदर्शनी बुद्धिः ब्रह्मादीनां न चेष्यते।
तिलोत्तमायां संरक्तौ कथं ब्रह्मत्रिशूलिनौ॥ ६३॥

पूर्वं क्रोधाग्निनादग्धो ददाह त्रिपुरं कथम्।
पूष्णः शशास दन्तांश्च भगस्यापि च लोचने॥ ६४॥

ब्रह्महा मद्यपः कामी दृष्टतत्त्वो यदीश्वरः।
का कथादृष्टतत्त्वानां तत्पद्धत्यनुगामिनाम्॥ ६५॥

कथं च केशवः केशिचाणूरनरकादिकान्।
व्ययोजयदकारुण्यादसुभिर्वसुभिश्च तान्॥ ६६॥

पराङ्गनाधनादायी मद्यपः प्राणिघातकः।
दृष्टतत्त्वो यदि हरिर्जितं शवरतस्करैः॥ ६७॥

प्रजापालनदक्षत्वादसुरान् सुरकण्टकान्।
नातो दोषो घ्नतोऽप्यस्ति तस्य चेद् धर्मगुप्तये॥ ६८॥

परस्त्रीद्रविणादानमायाशाठ्यप्रवृत्तयः।
किं न त्यक्ता हि वाञ्छास्ति तस्य चेद् धर्मगुप्तये॥ ६९॥

अधर्मश्चेन्द्रियो नास्य कथं तत्सृष्टिकारिता ।
अदृष्टदोषैरज्ञत्वात् तत्सृष्टिरथवा कृता ॥ ७० ॥

तृष्णया पाति लोकं वा तृष्णादासः कथं कृती ।
कारुण्याच्चेत् कथं लोकं मायया सममूमुहत् ॥ ७१ ॥

किं नासुरेषु कारुण्यं मृत्युजात्यादिदुःखिषु ।
सर्वत्र समदर्शित्वान्नारिसंज्ञास्य युज्यते ॥ ७२ ॥

रागद्वेषादिशबलं किमीदृक् चरितं हरेः ।
अनार्यचरितश्चैवं कथं स पुरुषोत्तमः ॥ ७३ ॥

अन्यैवासौ हरेर्मूर्तिः शिवा यदि विकल्प्यते ।
दृष्ट्वा हि यतयो यां न पुनर्यान्ति पुनर्भवम् ॥ ७४ ॥

न सती नासती चासौ नासौ सदसती मता ।
तस्मात् सत्त्वादसत्त्वाच्च सदसत्त्वाच्च सा परा ॥ ७५ ॥

मत्स्यादिमूर्तेः सान्या चेदन्यत्वादच्युता न सा ।
अनन्यत्वादनन्यापि साप्यशान्ता यथेतरा ॥ ७६ ॥

अथाप्यशान्ता तस्यैका शान्तान्यैकात्मनः सतः ।
बन्धकी नाम साध्वी स्याच्छरीरार्धेन संयता ॥ ७७ ॥

सदादिशब्दावाच्यत्वात् परा चेति न युज्यते ।
सतो हि परता युक्ता युक्ता कारणतापि च ॥ ७८ ॥

कारणत्वप्रतिक्षेपादन्यत्वस्य च पूर्ववत् ।
न कारणं न चान्यासौ नाच्युतश्चाप्यजातितः ।। ७९ ।।

अच्युतो यदि भावः स्यात् स नष्टः स्याद् रसादिवत् ।
अच्युतो यद्यभावः स्यादसंश्चासौ खपुष्पवत् ।। ८० ।।

सदसत्ता न युक्तैवं यथाग्नेरुष्णशीतते ।
अथाप्यनभिलाप्यः स्याद् युक्तोऽसौ कथमच्युतः ।। ८१ ।।

न चास्यानभिलाप्यत्वमात्मवत् तन्निषेधतः ।
अच्युतेर्नाच्युतः कश्चिदस्ति चेन्नाच्युतोऽच्युतः ।। ८२ ।।

मूर्तिरन्या च या तस्य क्लृप्ता व्यसनगुप्तये ।
कथमालम्बमानास्तां मुच्यन्ते निर्मुमुक्षवः ।। ८३ ।।

इन्द्रियाणीन्द्रियार्थेभ्यः कूर्मोऽङ्गानीव संहरन् ।
ओंकारं व्याहरन् स्मृत्या तद्भक्तो मुच्यते यदि ।। ८४ ।।

मुक्तिर्न हरिभक्तानां युज्यते हरिदर्शनात् ।
विकल्पस्मृतियोगत्वात् तद्यथा हरिदर्शनात् ।। ८५ ।।

निर्विकल्पापि धीर्नेष्टा योगयुक्तस्य मुक्तये ।
निमित्तग्रहणान् मिथ्या किं पुनः परिकल्पिता ।। ८६ ।।

रागादिसमुदाचाराद् ब्रह्मादीनां किरातवत् ।
तत्त्वचिन्तां निराकर्ष्यः संदेहो न हि कारणे ।। ८७ ।।

तथ्यधर्मोपदेशेन प्रतिपत्त्यापि वा स्वयम् ।
धर्मगुप्तिर्भवन्ती स्यात् सा द्विधाप्येषु दुःस्थिता ॥ ८८ ॥

सर्वे च सृष्टिहेतुत्वं ब्रुवते स्वात्मनः पृथक् ।
कस्यात्र वचनं भूतमभूतं वा विकल्प्यताम् ॥ ८९ ॥

तदेकत्वाददोषश्चेद् ब्रह्मापि ब्रह्महा कथम् ।
एकत्वप्रतिषेधाच्च तदेकत्वमयुक्तिमत् ॥ ९० ॥

आत्मभेदेऽपि चायोगात् त्रितयं चेशनं कथम् ।
दुःखहेतौ विमूढानां तच्छान्त्युक्तौ कथास्तु का ॥ ९१ ॥

वेदयोगोपदेशादितदुक्तेर्विकलत्वतः ।
न तावत् तथ्यधर्मोक्त्या शक्तास्ते धर्मगुप्तये ॥ ९२ ॥

प्रतिपद्विकलत्वाच्च नालं नेतुं परान् शमम् ।
यथा नेता स्वमार्गेण प्रपातपतितः परान् ॥ ९३ ॥

त्रय्यां हेतुविपर्यस्तैः कल्पनाजालकल्पितैः ।
अयुक्तियुक्तं मीमांस्यं युक्तं यत् त्यज्यते त्रयी ॥ ९४ ॥

नेशादिकारणं विश्वं युक्तमित्युदितं पुरा ।
सत्यपीशादिकर्तृत्वे किं हि तत् कृतकं भवेत् ॥ ९५ ॥

आत्मा तावदजन्यत्वान्न तत्कृतक इष्यते ।
धर्माधर्मौ न तस्येष्टौ तद्गुणत्वाद् यथाधुना ॥ ९६ ॥

देहोऽपि ताभ्यां निर्वृत्तः सुखदुःखोपलब्धये ।
देहोऽपि देहिनां तस्माद् युक्तो नेशादिकर्तृकः ॥ ९७ ॥

कल्पादौ देहिनां देहः प्राक्कृतादृष्टहेतुतः ।
सुखाद्युत्पत्तिहेतुत्वात् तद् यथाद्यतनी तनुः ॥ ९८ ॥

ईश्वरस्य यदैश्वर्यं तच्चेत् पुण्यकृतं भवेत् ।
तत्पुण्यपरतन्त्रत्वादीश्वरः स्यादनीश्वरः ॥ ९९ ॥

ईश्वरस्य यदैश्वर्यमकस्माच्चेत् तदिष्यते ।
तस्यान्यैरपि सामान्यादीश्वरः स्यादनीश्वरः ॥ १०० ॥

ईश्वरो ज्ञस्वभावश्चेत् तेन तत्कर्तृकं जगत् ।
कारणानुविधायित्वात् सर्वं ते चेतनं जगत् ॥ १०१ ॥

ईश्वरो यदि हेतुः स्याज्जगत् स्यादणिमादिवत् ।
ईश्वरो वा न हेतुः स्याज्जगच्चेन्नाणिमादिवत् ॥ १०२ ॥

ईश्वरः कर्मकर्ता चेत् पच्यते नरकेष्वपि ।
तदन्येषां हि पाके वा कृतनाशाकृतागमौ ॥ १०३ ॥

दुःखहेतोश्च नित्यत्वात् तद्दुःखोपशमः कुतः ।
नोष्णव्युपशमो दृष्टो ज्वलत्येव विभावसौ ॥ १०४ ॥

एकस्य वाविचित्रस्य कथं कार्यविचित्रता ।
नापि चेच्छादिवैचित्र्याद् युक्तैकस्य विचित्रता ॥ १०५ ॥

नित्योऽनवयवः सूक्ष्मः कारणं जगतः किल।
एकः सर्वगतश्चेति किमाश्चर्यं ततोऽपरम्॥ १०६॥

क्रीडार्थं तन्निमित्तं चेत् तस्याः प्रीतिफलं किल।
प्रीतौ स्वपरतन्त्रत्वादीश्वरः स्यादनीश्वरः॥ १०७॥

अन्योन्यभक्षणाद् भीतैस्तिर्यग्भिर्दुर्लभोत्सवैः।
निष्पेषच्छेददाहादिदुःखार्तैर्नारकैरपि॥ १०८॥

नृभिर्जन्मजरारोगभयशोकक्लमार्दितैः।
प्रीयते यो नमस्तस्मै रुद्रायान्वर्थसंज्ञिने॥ १०९॥

कृपणा धनिनो यद् वा परान्नादाश्च सात्त्विकाः।
स्वर्गे चाधर्मिणः केचिद् व्यक्तमीश्वरचेष्टितम्॥ ११०॥

अल्पायुषो गुणधना दुर्वृत्ताश्च चिरायुषः।
दातारश्चाल्पविभवा व्यक्तमीश्वरचेष्टितम्॥ १११॥

बौद्धा हि सुखिनः केचित् तद्भक्ता दुःखिनश्च किम्।
ईश्वराज्ञाविधानाच्च पुण्यभाक् किं न पापकृत्॥ ११२॥

वैचित्र्यकर्मणोऽज्ञस्य तद्धेतुत्वेन वाच्यता।
एतेन सृष्टिकर्तृत्वं प्रत्युक्तं ब्रह्मकृष्णयोः॥ ११३॥

संयमितमतिद्वारः स्थापयित्वा शिवे मनः।
तथोंकारमभिध्यायन् धारयन् धारणां हृदि॥ ११४॥

क्षित्यादिधारणाभ्यासात् प्राक्समाहितमानसः ।
ईशे प्रसन्ने दुःखान्तं गच्छतीत्येतदप्यसत् ।। ११५ ।।

मनोज्ञानोदयो यावत् तावन्मुक्तिर्न युज्यते ।
मनोज्ञानोदयात् पूर्वं यथा मुक्तिर्न युज्यते ।। ११६ ।।

मुक्तिर्नेश्वरभक्तानां युज्यते स्थाणुदर्शनात् ।
उपलम्भविहारित्वात् तद्यथा स्थाणुदर्शनात् ।। ११७ ।।

दुःखे हेतुर्यदीशः स्यान्नित्यत्वात् सोऽप्रतिक्रियः ।
अतो दुःखान्तगमनं नेश्वरादस्ति कस्यचित् ।। ११८ ।।

एतेन शेषाः प्रत्युक्ता ब्रह्मविष्ण्वात्मवादिनः ।
प्रीतिश्चैवमयुक्तत्वान्नेशादौ धीयते धियः ।। ११९ ।।

पापप्रक्षालनं चाद्भिः शुभादिक्रयविक्रयम् ।
दृष्ट्वा दुर्विहितं त्रय्यां युक्तं यत् त्यज्यते त्रयी ।। १२० ।।

पापं प्रक्षाल्यते नाद्भिरस्पृष्टेरनिदर्शनात् ।
अक्लेदाद् वासनाधानात् स्मृतिज्ञानशुभादिवत् ।। १२१ ।।

न पापं पातयत्यम्भः पौष्करं जाह्नवादि वा ।
स्पृश्यत्वात् क्लेदनाच्चापि गृहस्यन्दिकपूयवत् ।। १२२ ।।

अवगाहादिना क्षये प्राक्कृतापुण्यकर्मणाम् ।
कृततीर्थाभिषेकानां दुःखं न स्यादहेतुकम् ।। १२३ ।।

न च कर्मक्षये चापि न कश्चित् पातकी भवेत् ।
संशुच्यत्यन्तरात्माद्भिरित्युक्तिश्चेत् तदप्यसत् ॥ १२४ ॥

सन्तानान्तरसंक्रान्तं न पापमिति गृह्यते ।
अमूर्तत्वाद् यथा रागद्वेषमोहाद्यसंक्रमः ॥ १२५ ॥

न दानग्रहणं युक्तं पुण्यादेरिति निश्चयः ।
चित्तेन संप्रयोगित्वात् तद्यथा सुखदुःखयोः ॥ १२६ ॥

ब्रह्मलोकादिगमनं ज्वलनादिप्रपाततः ।
दृष्ट्वा दुर्विहितं त्रय्यां युक्तं यत् त्यज्यते त्रयी ॥ १२७ ॥

हेतुर्नाग्निप्रपातादि ब्रह्मलोकाद्यवाप्तये ।
प्राणबाधे कारणत्वाच्छलभादिप्रपातवत् ॥ १२८ ॥

नान्नपानपरित्यागः स्वर्गप्रापक इष्यते ।
क्षुत्संतापादिहेतुत्वादनिच्छानशनादिवत् ॥ १२९ ॥

अभोजनादौ पुण्यं च त्यागात् पापनिवृत्तिवत् ।
सत्यत्यागादिभिर्हेतोः स्यादेवं व्यभिचारिता ॥ १३० ॥

भुक्तित्यागो न पुण्याय यत् क्रियेयमपातका ।
यच्छुभमनस्कारस्य त्यक्तमनसिकारवत् ॥ १३१ ॥

त्रिकोटिशुद्धं यन्मांसं न तद् भक्षितमेनसे ।
रसादिपरिणामित्वाद् भैक्षान्नं न यथैनसे ॥ १३२ ॥

न मांसभक्षणं भोक्तुं भुज्यतेऽपापकारणात् ।
क्षुत्प्रतीकारहेतुत्वाद् यदृच्छागतभक्तवत् ॥ १३३ ॥

अशुचित्वादभक्ष्यं चेन्मांसं कायोऽपि चिन्त्यताम् ।
बीजस्थानादुपस्तम्भादशुचिर्विट्कृमिर्यथा ॥ १३४ ॥

शुक्रादिसंभवादेव मत्स्यमांसं विगर्हितम् ।
तद् घृतक्षीरादिहेतोः स्यादेवं व्यभिचारिता ॥ १३५ ॥

मांसादः प्राणिघाती चेत् तन्निमित्तत्वतो मतः ।
अजिनादिधरैर्हेतोः स्यादेवं व्यभिचारिता ॥ १३६ ॥

न मांसभक्षणं दुष्टं तदानीं प्राण्यदुःखनात् ।
मुक्ताबर्हिकलापादितण्डुलाम्बूपयोगवत् ॥ १३७ ॥

संकल्पजत्वाद् रागस्य न हेतुर्मांसभक्षणम् ।
तद्विनापि तदुत्पत्तेर्गवामिव तृणाशिनाम् ॥ १३८ ॥

अचेतनेषु चैतन्यं स्थावरेषु प्रकल्पितम् ।
दृष्ट्वा दुर्विहितं त्रय्यां युक्तं यत् त्यज्यते त्रयी ॥ १३९ ॥

सचित्तका हि तरवो न चतुर्योन्यसंग्रहात् ।
मध्यच्छेदेऽपि वास्पन्दाज्जडत्वे सति लोष्टवत् ॥ १४० ॥

स्पर्शतो यदि सङ्कोचाद् यथा मण्डलकारिका ।
सचित्तके तथाभीष्टे समङ्गाञ्जलिकारिके ॥ १४१ ॥

वह्निसंस्पृष्टकेशाद्यैः स्याद्धेतोर्व्यभिचारिता ।
चूर्णपारतसंसृष्टकेशैर्वापि विशेषतः ॥ १४२ ॥

चिकित्स्यत्वान्न तरवो युज्यन्ते हि सचित्तकाः ।
विनष्टस्यापि मद्यादेः प्रत्यापत्तेश्च संशयः ॥ १४३ ॥

समानप्रसवाद् वृद्धेर्दोहदाच्च सचित्तकाः ।
ऋतुजत्वात् तथा स्वापान्नापीष्टास्तुरगादिवत् ॥ १४४ ॥

दद्रुविद्रुमवैडूर्यकेशहेमाङ्कुरादिभिः ।
व्यभिचारात् तु तरवो न सिध्यन्ति सचित्तकाः ॥ १४५ ॥

अचित्तकत्वादेवैषां दोहदाद्यप्रसिद्धतः ।
हेतवः स्युरसिद्धार्था गदैश्च व्यभिचारिणः ॥ १४६ ॥

सत्त्वकर्माधिपत्येन कालजाः पादपादयः ।
नरके स्वर्गलोके च शस्त्ररत्नद्रुमा यथा ॥ १४७ ॥

यथार्थो हि त्रयीमार्गो ब्रह्मोक्तेर्वैद्यकादिवत् ।
अतीतानागतज्ञैर्वा तदुक्तेश्चेत् प्रसाध्यते ॥ १४८ ॥

[149-67 available only in Tibetan]

मीमांसातत्त्वनिर्णयावतारो नाम नवमः परिच्छेदः

दशमः परिच्छेदः

सर्वज्ञसिद्धिनिर्देशः

....

एवं संपश्यता शास्त्रा प्रव्रजन्न निवारितः ॥ १३ ॥

पश्यतः प्रातिहार्याणि धर्मं चास्यानुशृण्वतः ।
पुण्योपचयमालोक्य सुनक्षत्रस्य धारणम् ॥ १४ ॥

[1-12 om. MS. sed v.Tib]

सर्वज्ञसिद्धिनिर्देशो नाम दशमः परिच्छेदः

एकादशः परिच्छेदः

स्तुतिलक्षणनिर्देशः

व्यवहारेऽपि संमूढं दृष्टिमालाकुलं जगत्।
अद्वये व्योमवत् तत्त्वे निनीषुः सत्त्वभव्यताम्॥ १॥

लोकद्वयोपकाराय यस्तथ्यां लोकसंवृतिम्।
लोकोत्तरश्च यः प्राह तस्मै लोकविदे नमः॥ २॥

इति मध्यमकस्येदं संक्षेपाद् धृदयं कृतम्।
धीमतां नैकसूत्रान्तबिम्बदर्शनदर्पणम्॥ ३॥

dbu ma'i sñiṅ po'i bstan bcos 'di /
yaṅ dag bkrol nas dge ba ni //
cuṅ shig bdag gis gaṅ thob des /
'gro rnams byaṅ chub snod gyur cig // 4 //

स्तुतिलक्षणनिर्देशो नाम एकादशः परिच्छेदः

तर्कज्वाला नाम सूत्रं समाप्तम्

श्लोकार्धानुक्रमणी

APPARATUS CRITICUS

Sigla :

E	Ejima (Ed. *MH* 3)
Ec	Eckel (Tr. 3, 266-360. p. 195)
G	Gokhale (Ed. *MH* 1 & 2)
K	Kawasaki (Ed. *MH* 9)
M	reading of the Sanskrit MS.
N	Nakada (Ed. *MH* 6, 1-4)
Nk	Nakamura (Ed. *MH* 8)
Q	Qvarnström (Ed. *MH* 8, emendation by Lindtner)
R	emendation proposed by K.K. Raja (May 1999)
S	emendation proposed by L. Schmithausen (*MH* 9, 139-46)
T	assumed reading in the Sanskrit MS. (MSS.) of Tib. *MH* & *TJ* / based on (the editions of Nar, Pe, De, Co of *MH/TJ*)
x	syll. lost or om. in M

M incipit : *namaḥ sarvabuddhabodhisattvebhyaḥ // anyāyamārgānugataṃ samīkṣya prāyeṇa lokaṃ karuṇāyamānaḥ / kudṛṣṭijālāśanitulyam etac cakāra śāstraṃ bhagavadvivekaḥ //*

I

2b G/T : *ni*xxxxxxx M

3a *na dvayaṃ* G/T : xxx M

5c *tattva-* G/T : *sarva-* M

7b *-duḥkhāsa-* G : *duḥkhe 'sa-* M

10b *ghora-* G

11c *etān* R

13a *kiṃ punaś cakra-* G/T : xxxxx M

14b *duḥkhādyabhi-* M

15a *-āvegād* R

15b *duḥkhātureṣv* G/T : *duḥkhāntareṣv* M

15d *-kṣāropahāravat* G

16c *teṣāṃ pratikriyā* G : xxxxxx M

17c *-adbhūte(ḥ)* M

19b *iva* G/T : *api* M

19d *na santo bhava-* T : *na te saṃsāra-* G : *na sa* xxx M

24c *satputrān* G/T : *saputrān* M

29a *-sūra-* M

30b *kṛtīḥ* M

30c *nānuyāyād* G/T : *nā* xx *yād* M

32c *karuṇyāt* M

33b *-ākṣaṇaḥ* G/T : *ākṣaṇa-* M

II

4d *pratatya-* G

6d *dhyānajñāna* G/T : xxx *na* M

7c *hrīrapatrapya* G : *hrīpatrapya* M

9a *mahāyāna-* G/T : *naṣṭāṃga-* M

10d *-āśrayām* G/T

III

1b *cakṣuś cakṣus* E/T : *ca* xxx M

2 T : M 3

2a *andho 'pi* E/T : *ako 'pi* M

2b	*didṛkṣuviprakṛṣṭakān* E/T : M om.
2d	*trailokyā-* E/T : *traikālya-* M
3	T : M 2
8b	*-pūraṇe* R : *-pūraye* E : *xraye* M (=BHS)
12b	*na viyujyate* M
15c	*-samāhite citte* E/T : *saxxxxtte* M
17a	*anityādi-* T
17b	*uddhattam* E
17d	*saṃkṣipta-* M
18a	*kṣipram* M
19a	*-moha-* T : *-tamaḥ* E : xx M
26a	*tatra bhūtasvabhāvaṃ* E (cf. 6, 45d) : *tatra* xxxxx M
28b	*asatī* E/T : *satī* M
30d	*-paṃktayaḥ* M
31b	*-pavadanādayaḥ* M
32d	*dravyasat* E/T : xx*sat* M
34c	*sravaṇatvād* M
37b	*vano 'vayavī* E/T : *vanāvayavī* M
39a	*nānekā-* E/T : *nāneka-* M
40c	*saṃghātatvād* E/T : *pratighātād* M
40d	*tathāpi* T : *athāpi* E/M
43a	*ete* M
46c	*saty anutpattes* E/T : xxxxx M
47d	T : *dṛṣṭāntāc ca tvagādikāt* E/M
48c	*srāvanā-* M
50ab	E/T (= 49 cd) : M om.
51b	*tajjña-* E/T : *rajju-* M
55c	*dharmantarābhinirvṛtte* M
58a	*athavāsarvādgatvākṣi* M
58b	*pārārthyaṃ* M (cf. SK 17)
60-4 :	E/T : 60-1, 62 ab, 63 ab 64 M
68a	*neṣṭā-* E/T : *iṣṭā-* M

68d *yathetarā* E/T: xxx*rā* M
70b *manaḥ* E/T : *mataḥ* M
71d *vā* E
72c *lakṣyasya* (cf. 249) M : *lakṣyaṃ ca* E
73d *vā yataḥ* M/T : *vāyataḥ* E
74c *kāyavijñāna-* E/T : xxxxx M
74d *agnitve* E/T : *anyatve* M
77d *yathā gate* : *yathāgate* E/T
78d *jñāyate* E : *jāyate* M
80b *nāgati* xx *tī*-M : *nāsya gatir itī-* E : *na casya gatir itī-* R
83c *gantryakalpanā* E/M
87a *yujyete* E/T : *yujyate* M
94a *-saṃghāto* E/T : *saṃhāto* M
94b *tattvato* T : *ca tattve* E : *cata*x*to* M
97 M ad. : *dṛṣṭāntāsaṃbhavo yasmāt siddhasādhanatāpi vā/*
100c *rajanaṃ* E
103d *tadbuddhe* R
104b *saṃvṛtī* M
107c *cānya-* E/M
108a *samudāyas-* E
111b *nāśitāvat* M (cf. 196c) : *nāśitavat* E
111d ut 111b, *supra*
112c *citer* T : *cittād* E : *citte* M
114b *kalpanāyāṃ* M
115c *akṣayākṣayidharma-* E/T
116a *imāḥ* E/M
116d *-odgārā* E/M
118d *yat* M : *yas* E
119a *dveṣam-* E/T : xx M
123c *parakumbhasya* M
126b *'ṃśo* T : *'ṅgo* E/M

143a *tatadanyatvāt* M
143b *toraṇaṃ* M
151a *anirdeśasya* E/M
153b *athavā* T
154c *avikalpito* M
155a *svātmābhamati-* M (cf. 5, 36b)
155d *naḥ* T (cf. 3, 238d) : *ca* E/M
160d *pratyayo pratyayaḥ* M/T
172a *cāśūnyāḥ* M
176b *naṣṭe* M
189c *vyaktikaṃ tad svarūpeṇa* E : *vyaktixxxrūpeṇa* M
191 T : M 193
193 T : M 191
195d *jātito* E
201a *tasmān naikatvam* E : *tasyān naikatvāj* M
203d *tat* E
206a *tasyākaraṇād* E : *tasya karaṇād* M
207b *tadanyenāpi* T : *athānyenāpi* E : *anyenāpi* M
209b *caitanyaṃ* E/T : *caixx* M
210b *hi te* E/T : *heto* M
213c *hārārthaṃ* M
219d *īśo* E : *īśe* M
229b *kas ten-* M
231b *tasyāthotpāda* E/T
241a *na tannāśaṃ* M
242d *pradīyate M*
244c *saṃvṛtaṃ* M
249a *-karitva-* R
253c *siddhavat* M
255c *abhyudice* M : *yady arka* E
255d T : *tica iti* M : *udeti ca* E
257a *svabhāvāt* M
257c *māyebhagavan* E

257d *sarvabhāvatām* E
258d *sasvabhāvatām* E
259a *na sa*x M
266a *sar* xx *siddhe* M
268a *-niṣṭhānāt* E
269b *ā*xxx*vā* M
269c *mamatvenāpi* M
270a *anālambaiva* M
270c *uktaḥ saṃbodhasaṃbodhād* M
270d *saṃbodha* M
272b *antapāpataṃ vivivarjyatā* M : *antapātavivarjitam* E
272c *agatinayena gatyā* E
275b *nirābhāsā* M : *nirābhāsāt* E : *nirābhāsa-* Ec
278a *'nimittatvān* E/T
280b *mahātmānaṃ* E : *mahātmānaḥ* Ec
280d *-amama-* M
282a *buddhādyoktiḥ* E/M
283b *cittasyāyam* E
288b *tyajyate* M
288c *rātrā* M
289b *grāhyate* M
290d *tad* T
291c *tathāgato 'bhiṣṭo* M
292b *upalambhaḥ* M
292c *sañjyate* E
293b *-bhavāsya kuto rujā* E
293c *na lipyate* M
295c *-cācitta* M
296a *-śekharaṃ* E
297b *cetasā* M
297d *-jāta-* M
299b *-manasā* E

300b *-gamana-* M
300c *nirāloke* M
301a M/T : *yaḥ pīḍyamānaḥ* E
301c *-sattvaḥ* M/T : *-cittaḥ* E
302c *yathāśaktyā* E
305b *pratikṣaṇaṃ manoramāḥ* E
305c *-phala-* E
305d *kalpadrum āyate* E
306c Ec : *tad anyatra* E
306d *-udite* M
308a *dakṣa-* E/T : *dikṣv* M
308b *-vijñāyā* E/T : xxx M
313b *kṣetrāṇāṃ* T
313d *kāyāt* E/T
314b *spharaṇaṃ* E
315b *-ratna-* E
317b *asaṅgenā* M
320d *-vinīnīṣayāḥ* M
322c *-nihīnānām* E
324a *nirmitair* E
325b *saṃbuddhaḥ* M
326b *tadvat svaṃ* R : *tasmin sva-* E : *tadvān sau-* M
327b *tūryebhyo* E/T : *stūpebhyo* E/M
328a *vyāpta-* E : x*tā* M
328d *lokānāṃ pūrayā* E/M (*-yāṃ*)
331b *dehināṃ* E/T : *de*xx M
332b *-ābhāñji* M
333b *-divyāṃs* M : *-vyaktāñ* E/T
335c *jātan* E
336a *aprameyeṣu* E/M
337d *san* E : *sam* M
338a *pāṇīn* E/T : *pāta* M
340b *pare* M : *paraḥ* E

340c *bhaktārdra-* M
341b *mukāmala-* M
343 M ad. post ab : *maṇikāñcanasopāna-ruciramalavedikaiḥ*
344b *cāsakṛt* E/T : *ca sakṛt* M
346a *savitā* M: *sāvitro* E
346c x*dhayaty* M
348a *janmāvṛto* E : *janmāvartta-* Ec : *janmāvartād* M
348b *mṛtyudgrahād* M : *mṛtyugrāhād* E
350a *dravantam* E : *dr*xx M
350b *avidyāmārga-* Ec/T
358a *saprāti-* R : *saprati-* E/M
360c *mahātmyaṃ* E

IV

2c *śarīritvāc* T
2d *gotrasya* M
8d *ca* M
10b *janyeti* M
10d *bādhāṃ* M
14d *na ca* M
18b *-siddhe* M
22d *bhāvanāṃ* M
25b *paroditaḥ* M
26d *-vṛtir* M
30b *mārgo* M
32a *bhrānte* M
34a *vo* M
35a *bādhato* M
38c *-mataḥ* M
41c *duḥkhas* M
45a *niruddhiś* M
45b *sa jāto* M
45c *vidvaṃs* M

57c *kuto* M
60c *yathā yathā* M
67d *budhā* M
69b *buddher* R
69d *na* M
73d *kuto* M
74a *-vacanaḥ* M
V
1d *yogācxx* M
2b *abhāvād* T : *sadbhāvād* M
3b *-sthiteḥ* M
3d *tasmai vā-* M
4 =*Madhyāntavibhāga* 1, 6
5a *-labdhiś* M
5b *cāgrahaḥ* M (fons?)
6 =Asaṅga's **Vikhyāpana* (cf. IIJ 28 (1985) 275-9)
7d T : *-paro nayaḥ* M (cf. 9)
8 cf. *Vākyapadīya* 1.129
12a *svarūpatyāgitā yasya* M
12c *bhaxta* M
13b T : *darśanam* M
14d *-samī-* M
15a *naiṣā* M
16a *upalambhāc ca box* M
18c *yac ca* M
19d *vastuno 'py* T : xxx *py* M
20 cf. *Pramāṇasamuccaya* 1, 9-11
21c *tatra* T : *tathā* M
22c *dvyābhātā śaktibhedān na* R
23a *svaparāxxx M*
23b *sahakāyānukāritva* M
24b *dvyāsateti* M
25 cf. ad 20

26c T (cf. *PS* 1. 5c : *anirdeśyaṃ rūpam*) *anixxxxxsyam*
27a *cittabhāvo* M
28c *sūtreṣu* T: *śāstreva* M (pro *śāstre ca* ?)
29c *avikalpitārtha-* M (cf. 1, 54c)
30b T : *āka*xxx M
31 cf. *Ālambanaparīkṣā*
32 ibid. 2
33d T (cf. *AP* 2) : *adravya*xxxxx M
34a T : xx *saṃcita-* M
35c *rūpāntarai rūpakṛtais* M
36b T : *tadābhimati-* M (cf. 3, 155a)
37c T : xxxx*d* M
41a T : *dvayapra*xxxxx M (cf. *Viṃśatikā* 9)
43b *kṣuṇṇaṃ cāśānty anātma tad* R : *kṣuṇṇasyādvaitasāntata* M
44d T : xxxx*pi* M
45d *na cā-* M
48a *pallādisantāna* M
48b T : *sālū*xxx*saktikā* M
49b *utpatti-* M
50b *naparati-* M (cf. 5. 4bd)
51d T : *as*xxx M
52b T : *yadā bhūtāvabodhataḥ* M (cf. 3, 138 *yathā/yadā*)
54a T : *tannavāyasa* M
54cd cf. *Mahābhārata* etc.
55a T : *neṣṭa cā*x M
55b T : *sam*xx M
55d T : *pratī*xxx M
56d T : (cf. 19d) : *vastvapa*xxx M
59b *-ābhamati-* T (cf. 36b, 61b) : xxxx M
62d T : xx*yam* M

63c T : *kalpayatā* M
63d T : *ceṣṭam* .. *bhāva* M
64a T : *abhedāsattvadravyābyām* M
65a *anīlānutpalam* M (cf. *PS* 5. 15)
66a T : *nānyāpo*xxx*mānya* M
66b T : *dharmau* M
67c *-tve tadvācya-* T : M om.
68b *nabhilapyatā* M
69c *cāpy* T : *tad-* M
69d T (cf. 79b) : xxx*nnāviruddhatā* M
72c T (cf. 7d) *nanūtpā* xxx *dhādi-* M
73 cf. *Tibetan and Buddhist Studies*, 1984, p. 87, n.71
75a *namnā vai* (ibid. p. 83, n. 38) : *namnāto* M
76b *-svaxve* M (pro *svabhāvāt*?)
76c *utpatti-* M
76d T : *anvabhūtataḥ* M
79d T : *hyxxvya-* M
80c *-prahātrya-* M (cf. Wackernagel II, 2 § 651 f.)
81c *-tvān nāto 'nya* T : M om.
82b *bhave* M (cf. *Bodhisattvabhūmi*, p. 31 ; *MCB* 2, p. 95)
83b T (cf. *Bodhisattvabhūmi*, p. 31) : *pare*xxx *pādakaḥ* M
85d T: *ava*xxxxxx M
86a *jātasyanabhilapyatva* M
87a T : *tatrānya-* M
88c *syatām* M
89c *viśuddhaṃ* T : xxx M
90a *akliṣṭa-* T
91d *na* T : *ca* M
97d T: *tathālambanatattvataḥ* M
98c *khapuṣpābhā na* R : *khapuṣpā ca* M
100b T : x*tulyaṃ dāpy* M

102b *sa* M
108c *-anyaḥ* T : *-ādyaḥ* M
108d *-kṣamo* T : *kṣayo* M
114 M om.
VI
1d *sadā* N/T : *yataḥ* M
3d *ity ucyate* N/T : xxxx M
7a *nādahaṃ* M
7b *-vāt sa pūrvavat* T : xxxx*vat* M
8a *dadhānā* M
9c T: *anyac ca* M (pro *bodhānanyac ca*?)
13a *-vṛtti-* T : *vṛtya-* M
14a *yāpi* T : *yap*x M
16a *lakṣaṇai* M
17b *prakṛtis* T
18c *ayukto 'nyaḥ* T?
19a T : *nirvṛttir* M
19d *yathā* M
20b *deśābhedād* M
21a *-pratipattayo* T
21d *adṛṣṭā* M
22c *dadhyāt* M
27a *cet sa-* T : *te 'sya* aut *cet te* M
30 *mohasyā* M
31b *arthakriyātmatā* T
32a T : *-tvadvi-* M
32c *ceṣṭair* T?
38b *niṣiddhā cānu— melius*?
40c *ukte* M
43c *nanirdiṣṭāṣeṇa* M
43d *bhīkṣya* M
45c *tathā* : *yathoktam* M
M ad.: *dṛṣṭāntanyūnatā caiva ghaṭṭasya*

	dravyasattvataḥ
49-64	M om.
VII	
1-26	M om.
VIII	
1c	*kutaḥ* M
2a	*-purastāt* M
3a	*paśyaḥ* : *paśyan* Q/M
3d	*sātmyaṃ* M
6a	*tam abhyasya* M
6d	*mṛte* M
8	M om.
9d	*bhavaty* M
10d	*-vyaye* Q/T : *-vyayam* M
11b	*ced a- Q/T : deha-* M
11d	*sāmyaṃ* Q/T : *sāmye* M ; *yan* Q/T : *jan* M
14b	*-mānivat* M : *-mānavat* Q
16c	Q/G/T : *yuñjānaxxtti* M
18c	*-avṛta-* Q/T : *-vikala-* M
20d	*tvayā* Q/T : *bhūyā* M
21c	*yato bhāvitaḥ* Q/T : xxxxx M
21d	*muktid* M
24a	*-viṣayād* M
25d	*cetan* M
27a	*dhvani-* M
28b	*gamānāga-* M
28d	*dehajā kriyā* M
29b	x*jñānam* M
31a	*karaṇoktas* M
31d	*dātūvat* M
32d	*va* M (pro *ca*?)
35d	*dvīpa-* M
36a	*-vaśaga* M

36c xx *mokṣe* M (cf. 44a) : *nirmokṣe ca* Q
36d *baddhaḥ* M
39c *vāpy ātmā* Q : *vāyāte* M
40b Q/T : xx*bhāva* M
40d *kāraṇādi* M
41b Q/T : *tadva* M
42a Q/T: *ato* M
43a *jñāsya* M
43c Q/T: *vāviśiṣṭa*x M
44c *-atanyatvād* M
44d *vibhāvayoḥ* M
45c *pūrvakaś cittān* M
46b *na dahaty* M
47a *na taxxddhis* M
47c *dahanavad asmin* M
48a *cājñājñaḥ* M
48d *kupta* M
50a *yat pīḍānu-* Q : *yatpītānu-* M
50b *na duḥkhānu-* Q
50c *nāsau* : *hy asau* Q : *xsau* M
51d *amṛtaḥ* Q/T
52d *dīyate* M
53b *dīyate* M
54a *atisūkṣmo* M
61c *ātamatādyātmano* M
62a *naxxxviśeṣā* M
62b *nidhādhāno* M
63a *caikatra* M
64b *mukto* M
65c *asiddham* M
66a *mukta*
66d *vakāśitām* M
68a *upādānnā-* M

73b *pohyānapekṣanāḥ* M
73d *tenannaḥ* M
76b *as*x*vikalpatā* M
77a *ca viṣayo* M
80a *bodhye* M
80c *satyabhāvād* Q
80d *-samo* Q : *-kṣayo* M
82a *ajasya* Q/Nk : *ajaś ca* M : *bhedo 'sti* Q/Nk : *ced asti* M
82b *matā* M
83c xx*ṣpātta* M
84c *cāto* M
85a *jñeya-* M
85b *nyāyo* M
85c *nirvṛttau* M
85d *agocara* M
86c *tīrthaiḥ* M
86d *taṃ* M
87a *kaḥ* Q/T : x M
88b *ihaiva* M
91a *ajātaś cāyam* M
91b *-ajarāmaraḥ* M
92b *-anilaḥ* M
93a *sarvasyāsau* M
93b *cādināmataḥ* M
94a *-samāropa-* M
94b x*cyo vācyas* M
95b *tavatām* M
96b *bhītyā* Q/T : *dṛṣṭyā* M : *va* M
97b *na vāryate* M
97d *ta*x *idaṃ padam* M
98b *-tvādi-* M
98c *-graho* M

99a *jāti* M
101a *yataḥ* M
101b *kartrxxktṛte* M
101c *-sutasyeha* Q
103c *dhīr* M : *samāropā* M
103d *matā* M

IX

1d *-trāpāḥ* k : *-trapā* M
2d *-yukta* T : *ukta* k : *bhukta* M
3c *-tvāt* K/T : *tvā-* M
3d *iti* K : xx M
6c *'rtheṣu* K : *'rtheṣuḥ* M
7b *-jñānatas* K/T : *-jñānas* M
7c *śabdavac* K/T : *śabdavic* M
8b *-tvāt* K/T : *tvā* M
8d *athāpi* M : *yathāpi* K/T
10a *-vyaṅgyaḥ* K : *-vyaṃgaḥ* M
10c *vidvān* K : *vidvā* M
12d *evān-* M : *naivān-* K
13d *sva-* K/T : *sa-* M
14a *ivāndhānāṃ* K/T : *ivxxx* M (cf. *VP* 1. 42a)
17b T : *-dūṣaṇadarśanāt* K/M
17c *tathoktaṃ tad ya-* K : xxxxx M
18b *nyāyakovidā* K : *-āyatakovidā* M
20a *-kṣamaṃ* K : *-kṣasaṃ* M
21d K/T : *osavādyadhimuktivat* M
22a *kriyātvān na* K/T : *kriyatvānu* M
23b K/T : *itīkṣate* M
23d *-cārivan* K
24b *kṛtṛmatvataḥ* M : *'kartṛmatvataḥ* K
25b *akartṛkam* K/T : *atkartṛkam* M

26a	*-tvānumānāc ca* K/T : *-ānumānatvāc ca* M
27d	*tat kartṛkam* K
29b	*varṇṇāṃ nāyād* K
30d	*yathegitam* M : *yathehitam* K
31b	*asat-* K/T : *asa-* M
31d	*kriyokter* M : *mithyokter* K/T
32a	*-vad dhiṃsā* K/T *: rthasiddhitsā* M
33a	*mantra-* K/T : *manu-* M
34b	*mantra-* K/T : *manu-* M
35a	*-śāstra* K/T : *śāstre* M
	-mocakaḥ K : *-mocakāḥ* M
35d	*anyataraḥ* M : *anyatarā-* K
36a	*yajño* M
36c	*hi* M : *ni* K
37a	*bhoktrarthāḥ ... 'bhīṣṭā* K : *bhoktṛrthāḥ .. bhīṣṭāḥ* M
38b	*saṃcintya-* : *saṃcintya* K : *saṃcitya* M
38c	*-phxla-* M
38d	*āyatyām* K : *āvyatyām* K
39c	*saṃcintya-* : *saṃcintya* K
40b	*krīyā* K/T : *kṛpā* M
41a	*vyākhyānaṃ* K
41d	*dhuntūra-* K/M
42a	K/T : xxx *pānam* M
43a	*dṛṣṭam* K/T : *iṣṭam* M
	ca K : *catri* M
44b	*dvīyenodvipravṛttinā* M : *dīpe 'py advipravṛttinā* K
46d	*'dṛṣṭe* K/T : *iṣṭe* M
48b	*-vyaṅgyaḥ* K/T : *vyaṃgaḥ* M (cf. 10a)
49a	*saṃketasaṃbhavādau* K
50c	*hetuḥ* K : *hetu-* M
52d	*asmāc chabdān* K : *asmābdān* K

54a *chabdaḥ* K
55a *kriyā-* K/T : *kŗyā-* M
55d *'nitya iṣyatām* K : *nityadṛṣyatām* M
56a *-pānādi-* : *pānādi* K
56c *yadvat te* R : *varttante* K/M
57b *kriyā* K/T : *kṛyā* M (cf. 55a)
57c *tvāt* K/T : *-tvā* M
58d *vicārākṣama-* K/T : *vicārakṣama-* M
60a *pāpaṃ* K/T : *māyaṃ* M
60d *pratyapāyitā* : *pratyapāyinā* K
62a *yogasiddho* T
62d *nāśitāḥ* K/T : *nāśritā* M
63b *na ceṣyate* : *niṣedhyate* K : xxxte M
64b *tri-* K/T : *tr-* M
64c *śaśāda* K/T : *śaśānta* M
66d *tān* K/T : *tā* M
67d *jitaṃ* K/M (pro *jitaḥ*?)
69c *tyaktādi-* K
70a *adharmaś cet priyo* R/T : *adharmaś cendriyo* K/M (*athadharmas*)
70b *-kāritā* : *-kārite* K/M
71a *tṛṣṇayā* K/T *kṛṣṇayā* M
71d *samubhūbhuham* M
72b *mṛtyur* M
73b *īdṛk-caritam* K
74a *mūrtti* M
74b *yadi* K/T : *yayad* M
74c *yāṃ na* : *yānti* K/M
74d *punar* M : *na ye* K
75d *sāparā* ?
76b *acyutā* K : *acyuto* M
78a T : *śābdavācya-* K/M
80b *saṃnasau* M : *saṃnaṣṭaḥ-* K : *asaṃś cātma-* K

80d *asadātmā?* : *saṃtmaka-* M :
82d M : *nācyuteś cyutaḥ* T? : *nācyutaś cyutaḥ* K
83b *kḷptā* K : *kuptā* M
87d *sandahyo* M : *sandehyo* K
90d *ayuktima* M
92a *-yogopadeśādi* K : *-yogapadeśādi* M
92b T: *vitathatvataḥ* K/M (gloss!)
93b *parāṃc* K
93c *netā* K : *naitā* M
94b *svakalpādaujanmakaxtam* M : *kalpanājālakalpitaiḥ* K/T ???
99b *puṇyaṃ kṛtam* K/M
100b *akasamāc cet* M : *ākasmikam* K
101a *jña-* K : *jñaḥ* M
102d *jagac* K : *jaga* M
103b *narakeṣv api* K/T : *na*xxxx M
103c K/T : xxxxx*pāke* M
104c *dṛṣṭo* K/T : *dusto* M
106c *sarvagatas* T : *sarvatas* K/M
106d *tato 'param* K/T : xxxx M
107a *krīḍārthaṃ tan-* K/T : xxxx M
109b *klamāttaraiḥ* M : *klamāntaraiḥ* K
110a *yad vā* M : *yat vā* K
110b *sāttvikāḥ* K/T : sxxx M
111b *cirāyuṣāḥ* K/M
112d *kiṃ* : *kan* M : *ko* K : *pāpakṛt* K/T : *pānakṛt* M
113a *vaicitryat* M : *vaicitryāt* K
114a *susaṃvṛtabuddhi-* T : xxxxxx M : *samyamaka-mati-* K
114d *dharaṇāṃ* K/M
115c *duḥkhārttaṃ* K/M
115d *asan* K/M
118a *hetu yadīṣa* M

120b *-krayavikrayam* K : *kriyavikriyam* M
121c *vāsanādhānā* M
121d *-jñāna-* K : *-jñānāt* M
122c *-tvāt* K : *-tvā* M
122d *-kapūyavat* T : *kamāpnuvat* M : *kaphāpavat* K
123a *kṣaye* K/T : *kṣaṇa* M
123b *prākkṛta-* K/T : *prākṣitā* M
124d *-asat* : *asan* K
128b *-lokādyavāptaye* K : *lokādyathāptaye* M
128c *prāṇāpakāratvāc* K : xxxxxxxc M
130a *ca tyāgāt* K/T : *cetyāsāt* M
131a *bhukti-* T : *bhuñji-* K : *bhuji* M
131b *yatkriyāyām apātakāt* M : *yatkriyāyām apāpakāt* K
131c *-kārasya* K/T : xxx
131d *manasikāratyāgavat* K : xxxxxxx M
132a *māṃsaṃ* K/T : *māsaṃ* M
132d *yathainase* K/T: *yathenase* M
134d *aśuci-* K/M
135c *-kṣīrādir* K/M (pro-*kṣīrādi-*?)
136c *-dharai* M
137c *-kalāpādi* K
138c T : *tadvināpi* K : x*vināpi* M
139c *dṛṣṭvā... trayyām* S : *dṛṣṭyā... trayyā* K/M
140d *jaḍatve* S : *jātve* M : *jāḍyatve* K
141d *-jali-* K : *-jāla-* M
142a *-keṣāyiḥ* S : *-keṣādau* K
144c *ṛtujatvāt* S : *ritujanāt* M : *ṛtujanāt* K
144d *nāpīṣṭās* K : *cāpīṣṭās* S
145c *rūpāṇām* M : *rūpāṇām* K : *tarūṇām* (& *te* aut *tair*?) S
145d *na sidhyati sacittatā* S
146b *-siddhataḥ* K/M : *siddhatā* S

146d *gadais* K : *gaṇḍais* S (male, ut etiam *vyabhicāritā* etc.)
148b *brahmokter* K : *brahmoktai* M
149-167 M om.

X

1-13ab M om.
13c *evam* K/T : M om.
14a *prāti-* M : *prati-* K
14b *cāsyemam*? : *cāsya na* M : *cāsya nu* K

XI

2b *tathyā* M
4 M om.